Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

உ

# आत्मनाथस्तुतिमञ्जरी

# ஆத்மநாதஸ்துதிமஞ்ஜரீ



Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

உ

# आत्मनाथस्तुतिमञ्जरी

शिवपुर(तिरुप्पेरुन्दुरै)स्थ

आत्मनाथ - योगनायिका - दक्षिणामूर्ति - माणिक्यवाचक
स्तुतिनामावलि प्रणवषडाधार विधानसंकलनानत्मिका

# ஆத்மநாத ஸ்துதி மஞ்ஜரீ

சிவபுரமெனும் திருப்பெருந்துறையில் கோயில்
கொண்ட ஆத்மநாதர், யோகநாயிகாம்பாள்,
பிரணவபீடம், தக்ஷிணாமூர்த்தி, மாணிக்யவாசகர்
இவர்களின் துதிகள், நாமாவளிகள், பிரணவவிதானம்,
ஷடாதாரத் தியானம் அடங்கியது.

தொகுத்தவர்
வைத்ய S.V.ராதாகிருஷ்ண சாஸ்திரீ, ஸ்ரீ ரங்கம்

வெளியிடுபவர்
**மஹாபெரியவாள் டிரஸ்ட்**
பெங்களூர்

*அவ்யய* *2007*

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



ATMANATHA STUTI MANJARI

FIRST EDITION :- 500 COPIES

2007

PRICE Rs.100/-

COMPLIED BY

BRAHMAVIDYA RATNA RASHTRAPATI SAMMANITA
VAIDYA **S.V.RADHAKRISHNA SASTRI,**
22, VEERESWARAM APPROACH ROAD,
SRIRANGAM - 620 006, PH : 2432564

*PUBLISHED BY*

**SRI MAHAPERIYAVAL TRUST**
GURUKRIPA, 94, ITI LAYOUT MSRIT
BANGALORE 560054.

*COPIES AVAILABLE AT*

SMT P.VIJAYA,
DOOR NO.11, GANAPATHI ST,
ST.THOMAS NAGAR, MADIPAKKAM,
CHENNAI - 600091. PH : 2242 2622.

SRI BHAGAVANNAMA PUBLICATIONS
2/3, VINAYAKAM ST, WEST MAMBALAM,
CHENNAI - 600033. PH : 24893736

---

Lasertypeset & Printed at :
**V.K.N. Enterprises**
8/1, Dr. Ranga Road, Myalpore, Chenai-4 Ph: 24950775

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



# विषयसूचिका


श्रीगणपतिनामावलिः ஸ்ரீ கணபதி நாமாவளி 1

आत्मनाथध्यानम् ஆத்மநாத தியானம் 3

आत्मनाथवेदपादस्तुतिः ब्रह्मकृता
ஆத்மநாதவேதபாதஸ்துதி - பிரும்மா இயற்றியது 3

आत्मनाथस्तुतिः विष्णुकृता
ஆத்மநாதஸ்துதி - விஷ்ணு இயற்றியது 4

आत्मनाथस्तुतिः - रुद्रकृता
ஆத்மநாதஸ்துதி - ருத்திரர் இயற்றியது 5

चिन्मयलिङ्गाष्टकम् - रुद्रकृतम्
சிந்மயலிங்காஷ்டகம் - ருத்திரர் இயற்றியது 6

परमेश्वराष्टकम् - पार्वतीकृतं
பரமேச்வராஷ்டகம் - பார்வதி இயற்றியது 7

आत्मनाथस्तुतिः - वातपुरीश्वरकृता
ஆத்மநாதஸ்துதி - வாதவூரர் இயற்றியது 9

योगांबास्तुतिः - इन्द्रकृता
யோகாம்பாஸ்துதி - இந்திரன் இயற்றியது 11

योगांबाष्टकम् - रौक्षायणकृतम्
யோகாம்பாஷ்டகம் - ரௌக்ஷாயணர் இயற்றியது 12

शिवपुरांबाष्टकम् - वातपुरीशकृतम्
சிவபுராம்பாஷ்டகம் - வாதவூரர் இயற்றியது 14

श्रीमदात्मेश्वरतत्त्वपञ्चकम् व्यासकृतम्
ஸ்ரீமதாத்மேச்வரதத்வபஞ்சகம் வியாஸர் இயற்றியது 15

मन्त्रराजस्तवः धौम्योपदिष्टः
மந்திரராஜஸ்தவம் தௌம்யர் உபதேசித்தது 16

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



मन्त्रराजनामावलिः மந்திரராஜ நாமாவளி 20

आत्मनाथशतनामावलिः ஆத்மநாதஶதநாமாவளி 22

आत्मनाथसहस्रनामावलिः (ब्रह्मानन्दसहस्रनामावलिः)
ஆத்மநாதஸஹஸ்ரநாமாவளி (பிரும்ஹானந்த
ஸஹஸ்ரநாமாவளி 23

योगनायिकासहस्रनामस्तोत्रम् - नामावलिश्च
(राजराजेश्वरी सहस्रनामस्तोत्रम्)
யோகநாயிகாஸஹஸ்ரநாமஸ்தோத்ரம் - நாமாவளி
(ராஜராஜேச்வரீ ஸஹஸ்ரநாமஸ்தோத்ரம்) 23

प्रणवसहस्रनामावलिः பிரணவஸஹஸ்ரநாமாவளி 69

दक्षिणामूर्तिसहस्रनामस्तोत्रं नामावलिश्च
தக்ஷிணாமூர்த்தி ஸஹஸ்ரநாமஸ்தோத்திரம் -
நாமாவளி 80

माणिक्यवाचकसहस्रनामावलिः -
மாணிக்யவாசகஸஹஸ்ரநாமாவளி 108

माणिक्यवाचकाष्टोत्तरशतनामावलिः
மாணிக்யவாசகாஷ்டோத்தரசதநாமாவளி 120

माणिक्यवाचकाष्टोत्तरशतनामस्तोत्रं - नामावलिश्च
மாணிக்யவாசகாஷ்டோத்தரசதநாமஸ்தோத்ரம்
நாமாவளி 121

वीरभद्रसप्तविंशतिनामावलिः, अष्टोत्तरशतनामावलिः
வீரபத்ரஸப்தவிம்சதிநாமாவளி -
அஷ்டோத்தரசதநாமாவளி 125

प्रणवविधानम् - பிரணவ விதானம் 127

षडाधारेषु आत्मनाथध्यानम् -
ஷடாதாரங்களில் ஆத்மநாத தியானம் 131

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



## ஸமர்ப்பணம்

ப்ரபஞ்சத்திலுள்ள ஸ்தலங்களுள் மஹாபவித்ரமான துரீயாதீத க்ஷேத்ரமென்றும், விராட்புருஷருடைய சரீரத்தில் ஸ்ரீ ஷோடசாந்த மஹாஸ்தானமென்றும் சொல்லப்படும் திருப்பெருந்துறையில், எழுந்தருளி அருள் பாலிக்கும் "உலகிலுள்ள மற்ற சக்திபீடங்கள் யாவும் காரிய பீடங்கள்; அவைகளுக்கெல்லாம் ஆதாரமான காரணபீடம் இது ஒன்றே" என்று போற்றப்படும் சிவயோக பீடத்திற்கு நாயகியான ஸ்ரீ சிவயோக நாயகி அன்னைக்கும், அந்த அன்னைக்கும், சராசரங்களிலுள்ள யாவருக்கும், யாவற்றுக்கும் ஆத்மாவாக ஒளிரும் ஸ்ரீ ஆத்மநாதப் பெருமானுக்கும், சிவபக்த சிரோமணிகளுக்கெல்லாம் நாயகரான ஸ்ரீ மாணிக்கவாசகப் பெருமானுக்கும்,

## ஸமர்ப்பணம்

உடையாள் உன்றன் நடுவிருக்கும்; உடையாள்
நடுவுள் நீயிருத்தி அடியேன் நடுவுள் இருவீரும்
இருப்பதனால் அடியேன் உன்
அடியார் நடுவுள்ளிருக்கும் அருளைப் புரியாய்
பொன்னம்பலத்தெம்
முடியாமுதலே என் கருத்து முடியும் வண்ணம் முன்னின்றே

—ஸ்ரீ மாணிக்கவாசகர்.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



# முகவுரை

## ஸ்ரீ மஹாபெரியவாளின் அருளால்

ஸ்ரீ மஹாபெரியவாள் காஞ்சீ காமகோடி பீடாதிபதி பரம பூஜ்ய ஸ்ரீ சந்திரசேகரேந்திர ஸரஸ்வதீ ஸ்ரீ சரணர்களின் திவ்ய புண்யஸ்மரணத்துடன் குரு காணிக்கையாக **ஸ்ரீ ஆத்மநாத ஸ்துதிமஞ்ஜரி** என்று நூலை பெங்களூரிலுள்ள ஸ்ரீ மஹா பெரியவாள் டிரஸ்டின் சார்பில் பரமாத்ம ஸ்வரூபியான ஸ்ரீ சரணாளின் திருவடிகளில் ஸமர்ப்பித்ததில் தன்யர்களாகிறோம். இது பரமாத்ம ஸ்வரூபியான ஸ்ரீ குரு நாதருக்கு ஏற்ற காணிக்கை. ஒவ்வொரு நூல் தொகுக்கும் போதும் இந்தத் தொகுப்பாளனுக்கு உள்ளுணர்வில் ஏதோ ஒரு புத்தொளி, தெளிவும் உந்துதலும் ஊக்கமும் சோர்வின்மையும் தந்து தொகுக்கப் பெறும் நூலின் பொருளைத் தெளிவாக விளக்கும். இதனை ஸ்ரீ விஷ்ணு ஸ்துதி மஞ்சரி (12வது நூல்)யைத் தொகுத்தபோது மிகத் தெளிவாக உணர்ந்தேன். **ஸ்ரீ ஆத்மநாதஸ்துதிமஞ்சரியைத்** தொகுக்கும் போது 50 ஆண்டு காலமாக ஸ்ரீ மஹாபெரியவாளின் ஸ்ரீ சரண ஸேவையில் பெற்ற அனுபவம் ஆத்மநாத ஸ்வரூபத்தை உள் வாங்கப் பெரிதும் துணை நின்றது. இதனை ஸ்ரீ காஞ்சி காமகோடி பீடாதிபதி ஸ்ரீ சங்கராசார்ய ஸ்வாமிகள் அவர்களின் ஸ்ரீ சரணங்களில் நிவேதனம் செய்து கொள்கிறேன்.

## ஆளுடையார்

எங்கும் நீக்கமற நிறைந்திருக்கிற பரசைதன்யம் தன் தனித்தன்மையான பேருணர்வை அலை அலையாக அண்டங்கள் அனைத்திலும் பரப்பி ஒவ்வொரு உயிரினத்திடமும் ஆத்ம ஒளியாகத் துலங்குகிறது. நான் என உடலிலும் உள்ளத்திலும் விளக்கம் தந்து உயிராக நிற்கிறது. ஜீவன் ஆத்மா ஜீவாத்மா புருஷன் ஆள் என இதனைப் பல பெயர்களிட்டு அழைக்கின்றனர். உடல் உயிர்ப்புள்ளது எனத் தெரிவிப்பதால் அது ஜீவனாகிறது. உள்ளும் புறமும் நின்று

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



உடல் வாழ்வதற்கானவற்றை ஏற்றுத் தனதாக்கித் தானுக இயக்குவதால் அது ஆத்மா. ஜீவனுகிய ஆத்மா எனஜீவாத்மா. இவன் தன்னைப் பரமாத்மாவிடமிருந்து வேருகப் பகட்டாக அறிமுகப்படுத்திக் கொள்வான். சிலசமயம் ஜீவாத்மாவிடமிருந்து தான் வேறுபடுவதாகக் காட்டி ஜீவன் புரிகிற செயலனைத்திற்கும் அவனது எண்ணமனைத்திற்கும் தானே சாட்சியாக நிற்கிற அந்தராத்மா என்பான். அந்தராத்மா ஸாக்ஷியாகப்பணி புரிவதைப் பெருமையுடன் கூறுவான்.

இந்தப் பெரும் பூத உடலையும் வானளாவ அதிகாரம் செலுத்த முற்படுகிற உள்ளத்தையும் தன் ஆளுமைக்குட்படுத்துபவனுக, இந்த ஒன்பது வாயில்கள் கொண்ட கோட்டையின் ஆட்சியாளர், பேராளுனர் என்ற நிலையெடுத்து ஆள், புருஷன் என விளக்கம் தருகிருன். ஆண், பெண் அலி என்ற வேற்றுமையிலும் இவர் புருஷரே. தன் நிலையை ஒட்டி ஈசனையும் பெருமாள் - பரமாத்மா, பரமபுருஷன் என அழைப்பான்.

ஆளுடையார் கோயில் என்ற க்ஷேத்திரத்தில் ஈசர் ஆளுடையார், ஆத்ம நாதர். ஆள் என்ற ஜீவனைத் தாமே அருளால் ஏற்றுத் தன்னுடையவனுக்கித் தன்னை அவனது உடமைப் பொருளாக்கிப் பின் தன் அருளை அவன் மீது பாய்ச்சி, ஆட்கொண்டு ஆளுடையாராக அவர் தன்னை அறிமுகபபடுத்திக் கொள்வார். அந்த ஆளின் பசு நிலையைத் தன் பாசத்தால் அடக்கிப் பசுபதியாகித் தன்னை சார்ந்திருக்கிற பக்குவத்தை அவனுக்குத் தந்து ஆவுடையராகவும் ஆவார்.

சிவனை அருவ உருவ பாவனையில் சிவலிங்கமாக வழிபடுவர். பாணம் எனும் சிவ உருவம், சக்தி பீடம் என்னும் சக்தியின் உருவம், இரண்டின் ஆதாரமான பிரும்ஹ பீடம் என்ற மூன்றின் முழுத் தோற்றமே லிங்கமாகும். நடுவிலுள்ள சக்தி பீடத்தை ஆவடையார் என்பர். திருப்பெருந்துறையில் இந்த சக்தி பீடத்தை மட்டும் ஆதாரமாகக் கொண்டு நிர்குண ஜ்யோதியாய் விளங்குவதால் ஆவடையார் எனவும் அழைப்பர்.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



ஈசனின் நிலையை அவரது அருள் பெற்றவரே காண முடியும். ஸூக்ஷ்மம், ஸ்தூலம் என்ற பொருள் நிலையைக் கடந்த காரண நிலையானதால், நாம ரூபங்களைக் கடந்து குறிப்பீடுகளனைத்திற்கும் உட்படாத பரமன், நிர்க்குணர், நிஷ்கலர் என்றிருப்பவரை புலனுணர்வால் மட்டும் உணர்கிற எந்த ஜீவராசியும் காண்பது எப்படி !

முனிவர்கள் ஆத்மஜ்ஞானயோகத்தில் ஆழ்ந்திருக்கும் போது புலனறிவு மறந்து உள்ளொளியில் உணர்கிற பரதத்துவ நோக்கில் ஈசனை உணர்ந்து அந்தப் பேராற்றலில் தன் சிற்ருற்றலை ஆட்படுத்தி சிவயோகத்தால் ஈசநிலை பெற்று ஆனந்த மடைந்தனர் என்பர். இது மனித உணர்வு நிலைக்கு அப்பாற்பட்ட விஷயம். இத்தகைய நிலைக்கான அருள் பெருத பாமரனும் தான் பெற்ற இன்பத்தைப் பெற வேண்டுமென்று அக்கரையும் பரிவும் கொண்ட முனிவர்கள் தாங்கள் உணர்ந்தறிந்த நிர்க்குண நிஷ்கல வடிவை ஸகுண ஸகல நிலைக்கு வருமாறு ஈசனை வேண்டி, ஸகுண நிர்குணம், ஸகல நிஷ்கலம், ஸ்வரூப - நீரூபம் என்ற நிலையில் லிங்க வடிவில் ஈசன் தானே தோன்றுமாறு செய்தனர். அந்த லிங்க உருவில் தாமே ஸகுண வழிபாட்டு முறையில் வழிபட்டு மக்களுக்கு முனிவர்கள் சிவவழிபாட்டு முறையைப் பழக்கினர். ஈசன் லிங்க உருவில் பரமனுகப் பாமரனுக்கும் காட்சிதருகிருர். பல அடியார் பெருமக்களின் வரலாறு இதனை உறுதிப்படுத்துகிறது.

இத்தகைய வழிபாட்டிற்கும் வழிகாட்டியான குரு தேவை. அதற்காக அந்தணர் முதலிய பல வேஷங்களில் குருவாய் வ்ருகிருர். கல்லால் மரத்தடியில் ஸனகாதியருக்கு ஆத்ம தத்துவம் உபதேசிக்கிற தக்ஷிணாமூர்த்தி அவரே. திருப் பெருந்துறையில் குருந்த மரத்தடியில் யோகியாக மாணிக்கவாசகருக்குத் தன்னைக் காட்டி அருள் புரிந்தவரும் அவரே. மாணிக்கவாசகர் போன்று எத்தனை பாக்யசாலிகள் பெருமானைக் குருவாகக் கண்டனரோ ? குருவும் அவரே. குருவால் உபதேசிக்கப் பெறும் பொருளும் அவரே. அந்த உபதேச மொழியும் அவரே. அக்காட்சியும் அவரே.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



வெளிச்சம் எனும் ஜோதி இறைவனின் நிர்குணத் தோற்றம். அது நம் உணர்வில் விளக்கு திரி எண்ணெய் போன்ற பல ஸ்தூலப் பொருளேயும் நெருப்புக் குச்சியின் உரசலில் உருவான நெருப்பையும் எதிர்பார்க்கிறது. நெருப்புக் குச்சியும் திரி போன்று எரிபொருளே. நெருப்பெனும் ஸூக்ஷ்மப் பொருள் குச்சியின் உரசலால் வெளிப்படுகிறது. விளக்கிலோ திரியிலோ எண்ணெயிலோ நெருப்புக் குச்சியிலோ எரிக்கிற நெருப்பில்லே. விளக்கு அந்நிகழ்விற்கு ஆதாரம். மற்றவை அனைத்தும் எரிபொருட்கள். எரிபொருட்களின் ஆதாரமின்றி நெருப்பு வெளியாகாது. சூடும் ஒளியும் எரிபொருளின் தன்மைகளல்ல. நெருப்பின் தன்மை அவை. ஆனல் புலப்படுவதற்குரிய ஸ்தூல நிலே நெருப்புக்கில்லே. அதனல் திரி முதலிய ஸ்தூலப் பொருளே அது எதிர்பார்க்கிறது. உலகியலளவில் எரிபொருளும் முக்கியமானதே. தத்துவ நிலேயில் ஸ்தூலப் பொருளுதவியின்றியும் நெருப்பு உள்ளது.

சூடு நம் மீது பரவுவதை தோல் உணர்கிறது. தோலேத் தவிர வேறெதற்கும் அந்தத் தகுதியில்லே. ஒளிபரவுவதைக் கண்களின்றி உணர இயலாது. ஒளி பொருள் மீது பரவி அதனே விளக்குகிறது. விளக்கப் பெறுகின்ற பொருளின் உதவியின்றி வெளிச்சத்தைக் கண் உணராது. ஒளி, ஒளியால் விளக்கப் பெறுகிற பொருள். அதனேக் காண்கிற பார்க்கத் திறன் கொண்ட கண்கள், காண்பவரின் மனம் கொண்ட இச்சை, இவையே ஒளியைப் புலப்படுத்தும். இங்கு வெளிச்சத்தை உணர உதவுகிற காட்சிப் பொருள் லிங்கம். லிங்கம் - அடையாளம் காட்டுவது, நிரூபிப்பது.

வீட்டின் மீது காக்கை அமர்ந்துள்ளது. வழிப்போக்கனுக்கு அவ்வீட்டை அடையாளம் காட்டுபவன் ''அதோ காக்கை அமர்ந்துள்ளதே அது தான் உம்மால் தேடப்பெறுபவரின் வீடு'' என அடையாளம் காட்டுகிருன். அடையாளம் காட்டும் போது அவ்வீட்டின் மீதமர்ந்திருந்த காக்கை இவ்வழிப்போக்கன் அந்த வீட்டை அடையும் போது அங்கிருந்து அகன்று வேறு வீட்டின் மீது அமர்ந்திருக்கலாம்.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



ஆனால் காக்கையை அடையாளமாகக் கொண்டவன் காக்கையில்லாமையைப் பொருட்படுத்தாமல் அந்த வீட்டை அடைந்து வீட்டையும் பொருட்படுத்தாமல் அதில் வாழ்பவரைக் காண்கிறான். அவனுக்கு இலக்கு அம்மனிதரே. முக்கிய இலக்கை அடையாளம் காட்டப் பல லிங்கங்கள் அமையலாம். அதனால் அடையாளம் காட்டப் பெறுபவரே முக்கிய இலக்கு. பரமனைக் காணச் செல்பவனுக்கு இந்த ஊரும் கோயிலும் லிங்கமும் இலக்கெனின்னும் லிங்கத்தினுள் நானாக விளங்குகிற ஆத்மநாதரே முக்கிய இலக்காகும். இந்த முக்கியப் பொருளைக் காட்டி உணர்த்தவே வழிகாட்டியான குரு அவசியம். ஈசர் ஒருவரே அவரைக் காட்டியுணர்த்துவதற்கேற்ற குரு. ஜீவனிடமுள்ள பரிவால் அதற்கும் தன்னை ஆட்படுத்திக் கொள்கிறார்.

ஆத்மாவாகிய சிவன் சேதனத் தன்மையின் பூர்ண ஸ்வரூபம். சேதன சக்தி இவருள் அடங்கி வெளிப்படாமல் இயங்காமல் தன்னிலை வெளிப்பாடின்றி இருப்பது உண்டு. பிரும்மத்தினுள் மாயை அடங்கிய நிர்க்குண நிலை இது. பிரும்மத்திடம் ஸங்கல்பத்தை ஏற்படுத்தி வெளிப்பட்டு சிவனது அருவ ஆதார நிலையை மறைத்துத் தனித்து இயங்குவதுண்டு. உலகம் தோன்ற, நிலைக்க, மறைய இந்த சக்தி தனித்தவள்போல் தோன்றுவாள். இயக்கமற்ற நிலையில் சிவசக்திகளிடையே வேற்றுமையில்லை. சிவனோ சக்தியோ ஸ்தூலப் பொருளல்ல. விளக்கப் பெறும் பொருளின் மீது படர்கிற ஒளி போன்றது சிவசக்தி தத்துவம்.

ஆத்ம நாதரின் சக்தி யோகாம்பிகையாக அருவ நிலையில் பத்மபீடத்தின் மீதுள்ள ஸ்ரீ சக்கிரத்தில் மந்திர வடிவினளாக ஒளியாகக் காட்சி தருகிறாள். ஈசனும் அம்பிகையும் நிர்குணமாக இருப்பதால் கொடி மரம், நந்தி, பலிபீடம், உத்ஸவ விக்ரகம் முதலிய ஆலய அடையாளங்கள் இங்கு காணப்பெறவில்லை. சிவ சக்திகளுடன் ஒன்றிய மாணிக்யவாசகரே, காவலாளராக உற்சவ மூர்த்தியாகக் காட்சி தருகிறார். இச்சா சக்தியும் கிரியா சக்தியும் ஜ்ஞான சக்தியும் இவர்களின் ஸமஷ்டியான அம்பிகா சக்தியும்

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



அருவமாகத் தியானிக்கப் பெறுகின்றனர்.

இந்த இடமே ஆதி கைலாஸம். வடக்கிலுள்ள கைலாஸம் பின் சிவனது இருப்பிடமானது. சிவத்திடமிருந்து வெளியான ஸதாசிவர், ஈச்வரர், ருத்திரர், விஷ்ணு, பிரும்மா என்ற ஐவரும் தம் தனிப்பணியான அனுக்கிரஹம், திரோதானம், லயம், ஸ்திதி, ஸ்ருஷ்டி என்ற ஐம்பணிகளையும் ஆத்ம நாதரைத் தவமிருந்து வழிபட்டுப் பெற்றனர் என ஸ்தல மாஹாத்மியம் கூறும்.

முதன் முதலில் பரம்பொருள் நிலையிலிருந்து சிவ சக்தி நிலைக்கு இறங்கிய இடமானதால் அநாதி மூர்த்தபுரம். தெற்கிலுள்ள ஆதிகைலாஸம். வடகைலாஸத்திலிருந்து வேறுபடுத்த தக்ஷிண கைலாஸம், படைப்பில் வழிகாட்ட பிரும்மாவிற்கு வேதோபதேசம் செய்த இடமானதால் சதுர்வேதபுரம். முனிவர்களுக்குக் குருவாகி உபதேசித்ததால் ஞானபுரம், யோகபுரம், யோகபீடபுரம், யோகவனம், என, குருந்த (குந்த) மரத்தினடியில் தோன்றியதால் குருந்தவனம் என்ற குந்தவனம், சிவபுரம் என்றே மறை நூல்கள் இதனை அறிமுகப்படுத்துகின்றன.

அநாதியான க்ஷேத்திரமெனினும் அரிமர்த்தன பாண்டியனின் அமைச்சரான வாதவூரருக்குக் குருவாக, அவர் துயருற்ற நேரத்தில் குதிரைப் படைத்தலைவராக அசுவ நாதராக உருவெடுத்த இடமிது. மாணிக்கவாசகரின் வரலாற்றைச் சிறக்கச் செய்ய ஈசன் நடித்த பல லீலைகள் இவ்விடத்திலிருந்து தொடங்குகின்றன.

ஈசனின் அருள் வெளியான இடங்களாகப் பல ஸபைகள் இங்கு காட்சி தருகின்றன. ஒளிமயமான இந்தப் பெருஞ் ஜோதியைப் பற்றித் தீபங்கள் வடிவில் தத்துவங்கள் விளக்கம் தருகின்றன.

ஈசனை உணர்ந்து வழிபடுவதற்குரிய வழிகளை முறைகளை அத்துவாக்கள் என்பர்.அத்த்வா - வழி - மார்க்கம். ஒவ்வொரு எழுத்தும் அவரைக் காட்டும். அவ்வழி வர்ணாத்துவா. தனி எழுத்துகள் ஒன்று கூடிப் பதமாகி ஈசனைக் குறிப்பிடும். அது பதாத்துவா. எழுத்துக்களும் பதங்களும் தெய்வசக்தியைக்

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



காட்டி மந்திரங்களாகும். இவை காட்டுகிற வழி மந்திராத்த்வா. இம்மூன்றும் எழுத்து வடிவிலுள்ளவை. செவி வழியே உட்சென்று ஈசனின் நிலையை விளக்குபவை.

ஈசனின் பூர்ணவடிவம் பிரகாசம். தனித்து ஒளியான பிரகாசத்தைக் காண முடியாததால் வர்ணம் பதம் மந்திரமென்று விமர்ச நிலை பெற்று ஆராய்ந்து காண இம்மூன்றும் உதவுகின்றன. படைப்பின் தொடக்கத்தில் முதன் முதலாகத் தோன்றியது ஆகாசதத்துவம். அதன் தனித்தன்மை ஒலியின் மூலப்பொருளான பிரணவம். அதன் விரிவே வர்ணம் பதம் மந்திரம் என்ற மூன்றும்.

சொல்லின் பொருளாக, சொல்லால் உணரக் கூடிய பொருளாக உலகம் தோன்ற நிவ்ருத்தி, பிரதிஷ்டை, வித்யை, சாந்தி, சாந்தியதீதா என்ற கலைகள் தோன்றின. செயல் திறமையும் செயலழகும் இதன் மூலம் வெளிப்பட்டன. கலாத்துவாவால் மேலும் விளக்கம் பெற முற்பட்டதும் உலகமாக மாற வேண்டிய தத்துவங்கள் வெளிப்பட வேண்டியிருந்தது. இந்தத் தத்துவங்கள் அகத்தத்துவம் புறத்தத்துவம் என இருவகைப்பட்டன. அகத்தத்துவங்கள் 36, புறத்தத்துவங்கள் 60 என விரிந்தன. தத்வாத்துவாவை அடுத்து புவனாத்த்வா தோன்றியது.

ஸதாசிவர் முதலிய பல ஈச உருவகங்களும் இந்த ஆறு அத்த்வாக்களும் 27 நக்ஷத்திரங்களும் இக்கோவிலில் ஆங்காங்கு தீபங்களாக - தீபமாலைகளாகத் திகழ்கின்றன. இவற்றின் விளக்கத்தை ஸ்தல புராணங்களிலிருந்து உணரலாம்.

மந்திரம், யந்திரம், தேவதை, பிரபஞ்சம், குரு, சிஷ்யன் என்று சிவஞான போதம் பெற உதவுபவை ஆறு உண்டு. இவற்றின் உதவியால் பரம்பொருளை உணர்வதே முக்தி. இந்த ஆறும் அழகாகத் துல்லியமாக இந்த க்ஷேத்திரத்தில் இணைகின்றன. இந்த இணைப்பை உணர்த்துவதே இந்த ஆலயத்தில் பரம லக்ஷ்யம்.

இந்த யோக வனத்தில் தேவர்களும் முனிவர்களும் ஸித்தர்களும் யோகிகளும் சிவஜ்ஞானம் பெறத் தவம் புரிய

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



உதவிய அக்னி தீர்த்தம் முதலிய 27 புண்ய தீர்த்தங்களும் குருந்தம், வகிழம், அரசு, ஆல் முதலிய ஸ்தல வ்ருக்ஷங்களும் ஆலயத்தைச் சுற்றி உள்ளன.

தீப வரிசையாக உள்ள தத்துவங்களின் உண்மை நிலை உணர்வே தவமாகும். அருவ உருவமான ஜோதி அருவ உருவமான ஈசனைக் காட்டும். யோக நாயிகா ஸமேத ஆத்ம நாதரையும் ஒலிவடிவமான பிரணவத்தையும் குரு மூர்த்தியான குருந்த மரத்தையும் குருந்த மரத்தடியானையும் உள்ளத்தில் கண்டு மகிழலாம்.

குருந்தத்தின் தண்டு மூன்றாகப் பிரிகிறது. அது மும்மூர்த்திகளாகும். சிறுகிளைகளே வேதங்கள். அதன் வேர் ஓங்காரமாகும். தர்மம் இலைகள். ஞானமே மலர். யோகாம்பிகை அதன் மணம். ஆத்மநாதரே தேன். அதனை உண்ண வருகிற ஞானிகளே பறவைகள்.

பிரும்மாவும் விஷ்ணுவும் ருத்திரரும் தம் பணியை நிறைவுறச் செய்யப் பெருமானை வழிபட்ட இடம். தனது நெற்றிக் கண்ணிலிருந்த ஜோதியால் பூமியின் அடியிலிருந்த கங்கையைக் கொணர்ந்ததே அக்னி தீர்த்தமாயிற்று. விஷ்ணுவிற்கு ரக்ஷணத்திற்கு வழிகாட்ட உதவியது நாராயண தீர்த்தம். இவ்வாறு க்ஷேத்திரத்தின் ஒவ்வொரு அங்குலத்தின் பெருமையையும் ஸ்தல மாஹாத்மியம் விளக்குகிறது.

பிரும்மா, விஷ்ணு, மற்றும் ருத்ரர் தம் பணிகளைத் தொடங்கும் முன் தம் பணி நிறைவுற ஈசனைத் துதித்த துதிகள் இந்நூலில் முதலில் இடம் பெறுகின்றன. ஸதியாக, தக்ஷனின் புதல்வியாகப் பிறந்து சிவனை மணந்த பெருமை, சிவனிடம் தக்ஷனின் தவறான அணுகு முறையால் வீணானதால் இமவானின் மகளாகப் பிறந்து சிவனை அடைய யோகநாயகியுடன் இணைந்து தவமியற்றிய போது செய்த சிவஸ்துதி, வாதவூரடிகள் துதித்த துதிகள், யோகநாயகியை இந்திரன் துதித்தது. வேள்வித் தீயிலிருந்து வெளிப்பட்ட அக்னிவேசர் என்ற ரௌக்ஷாயணர் யோகநாயகியைத் துதித்த துதி. பிரும்ம தேவரிடம் மந்திர ராஜஸ்தவத்தை உபதேசமாகப் பெற்ற ரௌக்ஷாயணர் தன் வம்சத்தினருக்கு

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



உபதேசித்தார். (ரௌக்ஷாயணரின் வம்சத்தில் வந்த 300 குடும்பத்தினர் வழி வழியாக நம்பியார் என்ற பட்டத்துடன் ஈசனின் வழிபாட்டை நடத்தி வருகின்றனர் என்பதும் குறிப்பிடத்தக்கது). அதனையே புரூரவன் என்ற சந்திர வம்சத்தரசனுக்குத் தௌமிய முனிவர் உபதேசித்தார். அதிலுள்ள ஈசனின் 128 நாமங்கள் க்ஷேத்திரப் பெருமைக்கு முழு விளக்கம் தருபவையாக அமைந்துள்ளன. அதுவும் அதன் நாமாவளியும் இந்நூலில் இடம் பெறுகின்றன. வியாஸர் விளக்கிய தத்துவ பஞ்சரத்தினம் (வனம், புரம் க்ஷேத்திரம், தீர்த்தம், தேவர், பக்தர் என்ற ஆறு நிலைகளின் உட்பொருளை விளக்குவதாக அமைந்துள்ளது.)

ஆத்ம நாதரைப் பரம்பொருளாக விளக்கித் துதித்த ஸஹஸ்ர நாம ஸ்தோத்திரம் நாமாவளியுடன் உபநிஷதங்கள் பரம்பொருளை விளக்கக் கையாண்ட சொற்றொடரால் துதிக்கிறது. இது வல்ல, இதுவாயல்ல. இவ்வாறல்ல, இங்கிருப்பதல்ல, இன்றிருப்பதல்ல, என்றவாறு குறியீடு எதுவுமற்றவரை உபநிஷதங்கள் நேதி நேதி என சொல்லால் விளக்கம் தரும். அதே சொற்றொடர்கள் நாமங்களாக யோகநாத ஸஹஸ்ர நாமாவளியில் இடம் பெறுகின்றன. தொடர்ந்து யோகநாயகி அம்பிகை, பிரணவ பீடத்திலுள்ள ஓங்காரம், தக்ஷிணாமூர்த்தி, பக்தர்களில் முதல்வரான மணிவாசகப் பெருமான் இவர்களின் ஆயிரம் நாமங்கள் இடம் பெறுகின்றன.

உபாஸனை முறையில் சிறந்த பிரணவ விதானம் ஷடாதாரங்களில் ஆத்மநாதரின் உபாஸனை என்ற வழிபாடுகளும் மந்திர சாஸ்திர நியதிப்படி விளக்கப்பட்டுள்ளன. பிரணவத்தில் 51 மாத்ருகாக்ஷரங்களும் அடக்கம். பிரணவமே அ உ ம் என்ற மூன்றக்ஷரங்களின் கூட்டு. ஈசனை பிரணவ வடிவிலும் மூன்று அக்ஷர வடிவிலும் மாத்ருகாக்ஷர வடிவிலும் வழிபடுகிற முறை பிரணவ விதானத்தில் கூறப்படுகின்றது.

உடலின் நடுவே அமைந்த ஆறு ஆதாரங்களில் குண்டலினியையும் அதன் தேவதையாக சிவபெருமானையும்

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


தியானித்து மானஸபூஜை மூலம் தாரணை செய்வதும் யோக வழியைச் சார்ந்தது. அது கடைசியில் இடம் பெறுகிறது.

இவையனைத்தையும் குருநாதரின் அருளும் வழிகாட்டலும் பெற்றுப் பின் கையாள்வதே முறை. குருவின் அருளும் குருநாதரான மாணிக்யவாசகப் பெருமானின் அருளும் துணை நிற்க இவ்வழிபாடு ஆதிகுருவும் தக்ஷிணாமூர்த்தியும் பிரணவமூர்த்தியும் யோகநாயிகா நாதனுமான ஆத்மநாதனின் திருவருளைக் கூட்டுவிக்கும்.

## ஆளுடையார் திருக்கோயில்

கல்வெட்டுகளில் பவித்திரமாணிக்கச் சதுர்வேதி மங்கலம், ஊர் வழக்கில் திருப்பெருந்துறை, ஆளுடையார் கோயில், ஆவுடையார் கோயில், ஆவடையார் கோயில். மூன்று பிராகாரங்கள், பீடம் மட்டும் தெரிய, ஆளுடையாரெனும் ஆத்மநாதரும் யோகநாயகியும் அருவமாக ஞான யோக வழியில் தியானித்து வழிபடப் பெறுகின்றனர். பக்தரான மாணிக்கவாசகரே சிவ - சக்திகளின் முழு உருவமாக கோயில் உற்சவத்தில் நாயகராவார். கர்ப்ப கிருஹத்தில் லிங்கத்தின் ஆத்ம நாத மேனியில் சக்தி பீடம் மட்டுமே உள்ளது. பாணமும் பிரும்ம பீடமும் காணப்பெறவில்லை. பிரணவ பீடம், சதுர்வேத பீடம் எனும் சக்தி பீடத்தின் மீது குவளை சார்த்தி அலங்காரம் செய்யப் பெறுகிறது. ஆவுடையாருக்குப் பின் 27 நட்சத்திர தீபங்கள், ஸூரியன், சந்திரன், அக்நி என்ற மூன்று தேஜோ மண்டலத் தீபங்கள். அதன் முன் அர்த்த மண்டபம், அதன் முன் அமுது மண்டபம். அதன் நடுவே படைக்கல். நிவேதனம் செய்யும் போது புழுங்கலரிசியாலான அன்னம், தேன்குழல், அதிரசம் முதலியவை அதன்மீது படைக்கப்பெறுவது தனிச்சிறப்பு.

ஆத்மநாதருக்கு வடமேற்கில் முதல் பிராகாரத்தில் யோகாம்பிகையின் கோயில். உள்ளே யோக பீடத்தில் அம்பிகையின் பாதங்கள் மட்டும். அவற்றின் மீது தேவியை மனக்கண் முன் நிறுத்தி வழிபடுவர். கருங்கல் பலகணி வழியே தரிசனம் செய்வர்.

ஆத்மநாதருக்கு நேர் பின்புறத்தில் குருந்த மூல சுவாமி

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



தென்முகமாக யோகாஸனத்தில் அமர்ந்த திருக்கோலம். அவர் எதிரே அவரிடம் உபதேசம் பெறுகிற மணிவாசகர்.

முதல் பிராகாரத்தின் வட பகுதியில் திருவாசகத் திருக்கோயில், அதன் கிழக்கே நடராஜர். வடகிழக்கே ஆத்மநாத கூபம் (கிணறு) எனும் சிவதீர்த்தம். தென்மேற்குப் பகுதியில் மாணிக்கவாசகரின் உற்சவமூர்த்தி ஸன்னிதி.

மூன்று பிராகாரங்கள் உள்ளன. உள்ளே உள்ள மூன்ரும் பிராகாரத்தில் ஆத்மநாதரை வழிபடுகிரேம். தெற்கு நோக்கிய திருக்கோயில் ஊர் நடுவே உள்ளது. பாண்டிய தேசத்தின் பகுதியாக இருந்த இந்த ஊர் இன்று புதுக்கோட்டை மாவட்டத்தின் தென் எல்லேயிலுள்ளது. ஆனந்த வெள்ள ஆறு, சுவேத நதி, சுப்ர நதி என்ற புராணம் கூறும் வெள்ளேயாற்றின் கரையில் ஊர்.

ராஜகோபுரத்தின் வெளியே ஆயிரம் கால் (64 கால்) மண்டபம். இதனே ஒட்டிப் பழைய மாணிக்கவாசகர் திருக்கோயில். ஏழுநிலேக் கோபுரத்தில் குமரர், வெளி மூன்ரும் பிராகாரத்தில் தென் மேற்கு மூலேயில் வெயிலுவந்த விநாயகர், அவரது அருகில் இரு விநாயகர்கள். அவர் அமைந்த மண்டபத்தின் வடக்கே அக்னி தீர்த்தம். அதன் வடக்கே தியாகராஜ மண்டபம் இங்கே சிற்பங்கள், கொடுங்கைகள் மிக அற்புதமானவை. உலகப்புகழ் பெற்றவை. வீரபத்திரரின் அழகிய விக்ரஹம் காணத்தக்கது. அருகில் ஸ்தல விருக்ஷமான குருந்த மரம். கிழக்கே வஸந்த மண்டபம் இரண்டாம் கோபுர வாயில் ஒட்டி பஞ்சாக்ஷர மண்டபமெனும் கனக ஸபை. நடுப்பகுதியில் தூணில் மாணிக்கவாசகருக்கு உதவிய குதிரைச் சாமி எனும் அசுவநாதர். மேல் மண்டப தளத்தில் ஆறு அத்துவாக்களின் கட்டங்கள், இம்மண்டபத்தை ஒட்டி புதிய மாணிக்கவாசகர் மூலவரின் திருக்கோயில்.

இரண்டாம் ராஜகோபுரத்தின் வழியே இரண்டாம் பிராகாரத்தின் உட்சென்ருல் தில்லே மண்டபம் எனும் நடன சபை, இரண்டாம் ராஜகோபுரத்தின் வழியே உட்செல்ல மூன்ரும் பிரகாரம் எனும் உட்பிராகாரம். ஆத்மநாதர் திருக்கோயில் அமைந்த இடம்.

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



சிவ தீர்த்தமெனும் ஆத்ம நாத கூபம், சக்தி தீர்த்தமெனும் அக்னி தீர்த்தம், நெல்லியடியில் தேவதீர்த்தம், ரிஷி தீர்த்தம் எனும் ஓடை, சதாசிவ தீர்த்தம் எனும் குளிர்ச்சிக் குளம், மஹேச தீர்த்தமெனும் வாயு தீர்த்தம், ருத்திர தீர்த்தமெனும் சிவகங்கை, பெருமாள் கோவிலுக்கு அருகே ஓடையாக நாராயண தீர்த்தம், முதன்மையப்பர் சன்னிதிக் குளம் எனும் பிரும்ம தீர்த்தம், ஆனந்த வெள்ளாறு எனும் வெள்ளாறு இவை பெருமை மிக்க தீர்த்தங்கள். ஈசனின் கருணையால் தோண்டிய இடங்களெல்லாம் நீர் பெருகி அறுபத்து நான்கு கோடி தீர்த்தங்கள் உண்டு என்பர். சில கிணறுகளும், ஓடைகளும் இன்றும் தீர்த்தப் பெருமை பெற்றவை.

ஆத்மநாதருக்கும் யோகாம்பிகைக்கும் அபிஷேகம் செய்த நீர் வழிகின்ற தொட்டி நீர், திருத்தொட்டி தீர்த்தம். இதனை முகர்ந்தும் தெளித்துக் கொண்டும் புனிதம் பெறுவர்.

சிறந்த அனுஷ்டானங்களால் சிவப்பழமாகத் தோன்றுகிற நம்பிமார்கள் கோயிலின் தூய்மையையும், புனிதத்தையும் அதன் தெய்வீகத்தையும் குன்றாமல் பாதுகாத்து முறைப்படி வழிபாடு செய்கின்றனர். திருவாவடுதுறை ஆதீனத்தின் குருவரர்களின் நிர்வாகத்தில் அழகும் தெய்விகமும், புனிதமும் நன்கு காப்பாற்றப்படுகிறது.

இந்த நூலைத் தொகுத்து வெளியிடப் பல கையெழுத்து நகல்களைத் தந்துதவிய அன்பர்களுக்கும், தனித்து ஆவுடையார் கோயிலில் பூஜகராக உள்ள தைவத்திரு பாலஸுப்ரமண்யநம்பியார் அவர்களுக்கும் நன்றி கலந்த நமஸ்காரங்களை டிரஸ்டின் சார்பிலும் என் சார்பிலும் தெரிவித்துக் கொள்கிறேன். எனக்கு இந்த வாய்ப்பைத் தொடர்ந்தளிக்கிற ஸ்ரீ மஹாபெரியவாள் டிரஸ்டிற்கும் நன்றி கூறுகிறேன்.

22, வீரேசுவரம் அப்ரோச் ரோடு,
ஸ்ரீ ரங்கம், திருச்சி - 620 006.
5.2.2007.

வைத்ய
S.V. ராதாகிருஷ்ண சாஸ்திரீ

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



ஸ்ரீ குதிரைசுவாமி

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

॥ श्रीः ॥

# आत्मनाथस्तुतिमञ्जरी

## श्रीगणपतिषोडशनामावलिः ।

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लंबोदरश्च विकटो विघ्नराजो विनायकः ।
धूमकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ।
वक्रतुण्डः शूर्पकर्णो हेरम्बः स्कन्दपूर्वजः ।
षोडशैतानि नामानि यःपठेच्छृणुयादपि ।
विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा ।
संग्रामे सर्वकार्येषु विघ्नस्तस्य न जायते ।

ओं । सुमुखाय नमः । एकदन्ताय । कपिलाय । गजकर्णकाय । लंबोदराय । विकटाय । विघ्नराजाय । विनायकाय । धूमकेतवे । गणाध्यक्षाय । भालचन्द्राय । गजाननाय । वक्रतुण्डाय । शूर्पकर्णाय । हेरम्बाय । स्कन्दपूर्वजाय नमः ॥ (१६)

## श्रीमहागणपतिलघुनामसहस्रकम् ।

गणंजयो गणपतिर्हेरंबो धरणीधरः ।
महागणपतिर्लक्षप्रदः क्षिप्रप्रसादनः ॥
अमोघसिद्धिरमितो मन्त्रश्चिन्तामणिर्निधिः ।
सुमंगलो बीजमाशापूरको वरदः शिवः ।
काश्यपो नन्दनो वाचासिद्धो ढुण्ढिविनायकः ।
मोदकैरेभिरत्रैकविंशत्या नामभिः पुमान् ।
यः स्तौति मद्गतमनाः मदाराधनतत्परः ।
स्तुतो नाम्नां सहस्रेण तेनाहं नात्र संशयः ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



नमो नमः सुरवरपूजितांघ्रये नमो नमो निरुपममङ्गलात्मने ।
नमो नमो विपुलपदैकसिद्धये नमो नमः करिकलभाननाय ते ।।

ओं गणञ्जयाय नमः । गणपतये । हेरम्बाय । धरणीधराय । महागणपतये । लक्षप्रदाय । क्षिप्रप्रसादनाय । अमोघसिद्धये । अमिताय । मन्त्राय । चिन्तामणये । निधये । सुमंगलाय । बीजाय । आशापूरकाय । वरदाय । शिवाय । काश्यपाय । नन्दनाय । वाचासिद्धाय । ढुंढिविनायकाय नमः ।। (२१)

## श्रीमहागणपतिनामस्तोत्रं - नामावलिः ।

पञ्चवक्त्रो दशभुजो ललाटेन्दुः शशिप्रभः ।
मुण्डमालः सर्पभूषो मुकुटांगदभूषणः ।।
अग्न्यर्कशशिनो भाभिस्तिरस्कुर्वन् दशायुधः ।
धर्मप्रदोऽर्थदः कामदाता सौभाग्यवर्धनः ।।
विद्याप्रदो विभवदो भुक्तिमुक्तिफलप्रदः ।
आभिरूप्यकरो वीरश्रीप्रदो विजयप्रदः ।।
सर्ववश्यकरो गर्भदोषहा पुत्रपौत्रदः ।
मेधादः कीर्तिदः शोकहारी दौर्भाग्यनाशनः ।।
प्रतिवादिमुखस्तंभो रुष्टचित्तप्रसादनः ।
पराभिचारशमनो दुःखभञ्जनकारकः ।
सर्वदुःखहरो देवस्तं ध्यायामि गजाननम् ।।

ओं गं । पञ्चवक्त्राय नमः । दशभुजाय । ललाटेन्दवे । शशिप्रभाय । मुण्डमालाय । सर्पभूषाय । मुकुटांगदभूषणाय । अग्न्यर्कशशिनो भाभिस्तिरस्कुर्वते । दशायुधाय । धर्मप्रदाय । अर्थदाय । कामदात्रे । सौभाग्यवर्धनाय । विद्याप्रदाय । विभवदाय । भुक्तिमुक्ति-फलप्रदाय । आभिरूप्यकराय । वीरश्रीप्रदाय । विजयप्रदाय । सर्ववश्यकराय । गर्भदोषघ्ने । पुत्रपौत्रदाय । मेधादाय । कीर्तिदाय । शोकहारिणे । दौर्भाग्यनाशनाय । प्रतिवादिमुखस्तंभाय । रुष्टचित्तप्रसादनाय । पराभिचार शमनाय । दुःखभंजनकारकाय । सर्वदुःखहराय ।देवाय । गजाननाय नमः ।। (३३)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



## आत्मनाथध्यानम्

दशशतदलपद्मे संस्थमानन्दकन्दं
विधिहरिगिरिशैक्यं विद्युदुद्भासमानम् ।
प्रणवमयमतर्क्यं सूक्ष्मसूक्ष्मं महान्तं
शिवपुरनिलयं तं चिन्तयाम्यात्मनाथम् ॥

आदौ धातृहरीश्वरस्थितिकरी वेदागमोद्धारिणी
योगाध्वादिरताऽद्रिजेप्सितकरीक्षाऽदेवसंहारिणी ।
सन्दिग्धावनिनिश्चये नृपतये वाजीप्रदात्री शिवैः
क्रीडन्ती द्विजभक्तिमुक्तिघटिनी ह्यात्मेशलीलागतिः ॥

## आत्मनाथवेदपादस्तुतिः

(ब्रह्मकृता)

नित्याय निर्विकल्पाय निर्मलाय महौजसे ।
निराकाराय गुरवे जगतां गुरवे नमः ॥ १ ॥

नादाय बिन्दुरूपाय कलाकाराय तेजसे ।
सहस्रभुजपादाय सहस्राक्षाय ते नमः ॥ २ ॥

चिदानन्दाय शुद्धाय महानन्दस्वरूपिणे ।
महादेवादिदेवाय पशूनां पतये नमः ॥ ३ ॥

अणोरणीयसे तुभ्यं महतश्च महीयसे ।
परात्पराय पुण्याय क्षेत्राणां पतये नमः ॥ ४ ॥

वेदागमविचिन्त्याय वेधसेऽजिनवाससे ।
बहिर्मुखैरदृश्याय दिशाञ्च पतये नमः ॥ ५ ॥

स्वेच्छासृष्टाखिलाण्डाय कारणत्रयहेतवे ।
भक्तचित्तनिवासाय सेनानां पतये नमः ॥ ६ ॥

चन्द्रखण्डावतंसाय चराचरमयाय ते ।
शाश्वतायादिदेवाय वृक्षाणां पतये नमः ॥ ७ ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



त्वदाधारमिदं सर्वं त्वदन्तस्समुपस्थितम् ।
त्वमात्मनाथस्सर्वेषां पुष्टानां पतये नमः ॥ ८ ॥

जगन्मात्रे जगद्धात्रे जगद्धर्त्रे सुतेजसे ।
मत्पित्रे जगतां भर्त्रे ह्यन्नानां पतये नमः ॥ ९ ॥

शरणं भव सर्वेश त्वमेव शरणं मम ।
पाहि मां पाहि मां नित्यं पाहि मामात्मनायक ! ॥ १० ॥

## आत्मनाथस्तुतिः

(विष्णुकृता)

अणीयांसमाद्यं महीयांसमीशं हृदन्तस्सरोजान्तरस्थं तटस्थम् ।
अनन्तं ह्यचिन्त्यं विचिन्त्यस्वरूपं सदा कुन्दमूलेश्वरं सन्नमामि ॥ १

सदानन्दकन्दं चिदानन्दमूलं महानन्दरूपं महेशं गिरीशम् ।
अगम्यं हि तर्कैः सुगम्यं मुनीन्द्रैः सदा कुन्दमूलेश्वरं सन्नमामि ॥ २ ॥

प्रपञ्चातिरिक्तं प्रपञ्चस्वरूपं जगत्प्राणरूपं जगत्त्राणधीरम् ।
स्वकुक्षिस्थलोकं जगत्साक्षिणं तं सदा कुन्दमूलेश्वरं सन्नमामि ॥ ३ ॥

निराकारमच्छं निरीहैर्निरीक्ष्यं निजं निर्मतं निर्मलं धर्मरूपम् ।
निराकारमोङ्कारमाद्यं ह्यभेद्यं सदा कुन्दमूलेश्वरं सन्नमामि ॥ ४ ॥

समस्तं समाकृष्य लीनं च काले विसृज्याथ सर्वं यथावत्सृजन्तम् ।
हृदन्तः प्रविश्याथ सर्वं नटन्तं सदा कुन्दमूलेश्वरं सन्नमामि ॥ ५ ॥

गुणातीतमीड्यं गुणानां निदानं जगन्मूलकन्दं जगद्देशिकं तम् ।
भुजङ्गेशहारं त्रयीसारसारं सदा कुन्दमूलेश्वरं सन्नमामि ॥ ६ ॥

वहन्तं करैर्वह्निसृक्पुस्तकानि भुजङ्गं वरं चाभयं दोःस्थलैश्च ।
चतुर्भिस्त्रिणेत्रान्वितं दक्षिणास्यं सदा कुन्दमूलेश्वरं सन्नमामि ॥ ७

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



विशुद्धं प्रसिद्धं त्वसिद्धातिदूरं विशुद्धान्तरंगे सदा संवसन्तम् ।
नितान्तं नटन्तं कृतान्तं हरं तं सदा कुन्दमूलेश्वरं सन्नमामि ॥ ८ ॥

वटस्थं वरिष्ठं दृढस्थं गरिष्ठं कुलीनं धुरीणं प्रवीणं पुराणम् ।
सुमोदं सुनादं सुवेदैकवादं सदा कुन्दमूलेश्वरं सन्नमामि ॥ ९ ॥

सदानन्दसम्पूर्णमोदावहं तं हरिप्रोक्तमीशस्य रत्नस्तवं यः ।
सकृद्वापि यत्र स्थितो वापि मर्त्यः पठेद्भक्तितः सच्चिदानन्दभाग् स्यात् ॥

## आत्मनाथस्तुतिः

(रुद्रकृता)

चतुर्वेदपुरीशाय शाश्वतायादिमूर्तये ।
आत्मनाथाय जगतां गुरवे ब्रह्मणे नमः ॥ १ ॥

सद्घनानन्दकन्दाय चिदानन्दस्वरूपिणे ।
कुन्दभूरुहवासाय गुरवे ब्रह्मणे नमः ॥ २ ॥

विधातृहरिमुख्यानां विश्वेषां जगतामपि ।
ज्ञानदात्रे सुमहते गुरवे ब्रह्मणे नमः ॥ ३ ॥

अणोरणीयसे तस्मै महतश्च महीयसे ।
तुर्यातीताय शुद्धाय गुरवे ब्रह्मणे नमः ॥ ४ ॥

स्रष्टुं विधातृरूपाय रक्षितुं विष्णुरूपिणे ।
संहर्तुं कालरूपाय गुरवे ब्रह्मणे नमः ॥ ५ ॥

विधिविश्वम्भराभीष्टप्रदाब्जचरणाय ते ।
विश्वातीताय विश्वस्मै गुरवे ब्रह्मणे नमः ॥ ६ ॥

सहस्रशिरसे तुभ्यं सहस्राक्षिभुजाङ्घ्रये ।
सहस्रागमवेद्याय गुरवे ब्रह्मणे नमः ॥ ७ ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



पञ्चाननाय देवाय पञ्चब्रह्मस्वरूपिणे।
पञ्चाक्षरस्वरूपाय गुरवे ब्रह्मणे नमः ॥ ८ ॥

मद्भर्त्रे जगतां पित्रे कारणत्रयहेतवे।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ ९ ॥

अपराधायुतोपेतं महाकल्मषमानसम्।
पाहि मां पाहि मां नित्यं पाहि मामात्मनायक ॥ १० ॥

रुद्रेशकथितं स्तोत्रं दशकं यः पठेत् पुमान्।
कालमृत्युमतिक्रम्य स चिरायुः सुखी भवेत् ॥ ११ ॥

## चिन्मयलिङ्गाष्टकम्

(श्रीरुद्रकृतम्)

ब्रह्ममुखामरपूजितलिङ्गं जिह्मगभूषणभूषितलिङ्गम्।
सिंहमहामदमर्दनलिङ्गं चित्त सदा भज चिन्मयलिङ्गम् ॥ १ ॥

कनकधराधरकार्मुकलिङ्गं सनकमुखादिसुसन्नुतलिङ्गम्।
दिनकरकोटिसुदीधितिलिङ्गं चित्त सदा भज चिन्मयलिङ्गम् ॥ २

अष्टविभूतिदमिष्टदलिङ्गं सृष्टजगत्त्रयरक्षकलिङ्गम्।
अष्टमहाभयशिक्षकलिङ्गं चित्त सदा भज चिन्मयलिङ्गम् ॥ ३ ॥

मत्तगजाजिनवेष्टितलिङ्गं दग्धजगत्कृतपंचकलिङ्गम्।
उत्तमपूरुषवत्सललिङ्गं चित्त सदा भज चिन्मयलिङ्गम् ॥ ४ ॥

अङ्गभवाङ्गसुभङ्गदलिङ्गं तुङ्गजटाभरशोभितलिङ्गम्।
मङ्गलदायकमद्भुतलिङ्गं चित्त सदा भज चिन्मयलिङ्गम् ॥ ५ ॥

पङ्कजनेत्रसमर्चितलिङ्गं शङ्करमादिममच्युतलिङ्गम्।
सङ्कटदोषनिवर्तकलिङ्गं चित्त सदा भज चिन्मयलिङ्गम् ॥ ६ ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



अभ्रसभान्तरनर्तनलिङ्गं शुभ्रविभूतिविभूषितलिङ्गम्।
शुभ्रहृदम्बुजशोभितलिङ्गं चित्त सदा भज चिन्मयलिङ्गम्॥ ७॥
कुन्दवनान्तरमन्दिरलिङ्गं मन्दहसाननसुन्दरलिङ्गम्।
वन्दितभक्तजनावृतलिङ्गं चित्त सदा भज चिन्मयलिङ्गम्॥ ८॥
रुद्रकृताष्टकमद्भुतमेतद्भद्रकरं पठतीह मनुष्यः।
इष्टफलं समवाप्य यथेष्टं शिष्टजनोत्तम एव हि स स्यात्॥ ९॥

## श्रीपरमेश्वराष्टकम्

(पार्वतीकृतम्)

पङ्कजासनपद्मलोचनसद्गुरोऽतुलपावन
वैभवाश्रितपारिजातक पाहि मां परमेश्वर।
कामितार्थदपादपङ्कज कालकाल जगद्गुरो
कुन्दभूरुहमन्दिरेश्वर सन्ददस्व मदीप्सितम्॥ १॥
कारणत्रयमूल बालशशांकखण्डशिरोमणे
कार्मुकीकृतशीतगुम्फधराधरेन्द्र जगन्मणे।
लोचनीकृतशीतरश्मि कृपीटयोनि नभोमणे
कुन्दभूरुहमन्दिरेश्वर सन्ददस्व मदीप्सितम्॥ २॥
कैटभारिशिलीमुखातुलकाश्यपीरथ धूर्जटे
कल्पितावस कामितार्थप्रदान गौरनदीतटे।
व्यालभूषणजालशोभित व्याघ्रचर्मलसत्कटे
कुन्दभूरुहमन्दिरेश्वर सन्ददस्व मदीप्सितम्॥ ३॥
वीतिहोत्रसुतीर्थतीरविहार विश्वधुरन्धर
वीरवर्य विरिञ्चिसन्नुत वृक्षरूपकलेबर।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



नीतिपेशलमानसाम्बुजनित्यवास महाप्रभो
कुन्दभूरुहमन्दिरेश्वर सन्ददस्व मदीप्सितम् ।। ४ ।।

विध्यदृष्टसुशीर्षशोभित विष्णवदृश्यपदाम्बुज
निर्जरद्रुमपुष्पजालसुगन्धितस्वदिगन्तरे ।
मित्रवह्निशशीमरुज्ज्वलयज्वखावनिकाकृते
कुन्दुभूरुहमन्दिरेश्वर सन्ददस्व मदीप्सितम् ।। ५ ।।

कालनीरदनीलकन्धर शूलपाशधराद्य मां
पालयाखिलवैभवाजकपालभृत्करपङ्कज ।
कालगर्वहरान्धकान्तक कृत्तिवासक धूर्जटे
कुन्दभूरुहमन्दिरेश्वर सन्ददस्व मदीप्सितम् ।। ६ ।।

कुन्दभूरुहमूलमृत् तव जन्ममृत्युजराधिहा
कोटिजन्मकृताघसंहृतिदीक्षिता भवभेषजी ।
तादृगद्भुतकुन्दभूरुहदर्शनादपवर्गकृत्
कुन्दभूरुहमन्दिरेश्वर सन्ददस्व मदीप्सितम् ।। ७ ।।

नामरूपविहीन निर्गुण निष्कलंक महामहः
प्राणनाथ परात्पराच्युत कारणत्रयकारण ।
नादबिन्दुकलास्वरूप सहस्रपत्रनिकेतन
कुन्दभूरुहमन्दिरेश्वर सन्ददस्व मदीप्सितम् ।। ८ ।।

पर्वतेन्द्रसुताकृतं परमेश्वराष्टकमद्भुतं
पावनं परमार्थदं परमात्मनायकसन्निधौ ।
भक्तियुक्तमनाः पठेद्यदि दुर्लभं परमं पदं
प्राप्य निर्वृतिमेत्य शाश्वत एव तत्र वसेदसौ ।। ९ ।।

*—*—*

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


# आत्मनाथस्तुतिः

## (वातपुरीश्वरकृता)

मन्दहाससुन्दरारविन्दवक्त्रशोभितं
नन्दनीयभूसुरावतारवन्दितद्विजम् ।
कुन्दकुड्मजालरम्यदन्तपंक्तिभासितं
कुन्दमूलमन्दिरस्थमिन्दुचूडमाश्रये ।। १ ।।

कुण्डलीशकुण्डलं महाण्डकादिताण्डवं
चण्डभानुदीधितिप्रकाण्डकान्तिकुण्डलम् ।
पुण्डरीकवर्यचर्ममण्डितावलग्नकं
कुन्दमूलमन्दिरस्थमिन्दुचूडमाश्रये ।। २ ।।

पुण्डरीकपूःसमृद्धचताण्डवं दयाकरं
खण्डितामरेन्द्रवैरिमण्डलं महाप्रभुम् ।
खण्डशीतरश्मिफालमण्डलाग्निमण्डलं
कुन्दमूलमन्दिरस्थमिन्दुचूडमाश्रये ।। ३ ।।

अक्षयार्थदायकं प्रतिक्षणं क्षमापकं
रक्षितद्विजार्भकं प्रधक्षितारिलक्षकम् ।
दक्षयागशिक्षकं विचक्षणं सुरक्षकं
कुन्दमूलमन्दिरस्थमिन्दुचूडमाश्रये ।। ४ ।।

कंजजादिदानवारिपुंजवन्दितांघ्रिकं
भंजिताश्रितापदं तमंजसार्थदायकम् ।
मंजुलामृतादियुक्तिवाक्यजालरंजकं
कुन्दमूलमन्दिरस्थमिन्दुचूडमाश्रये ।। ५ ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



तुङ्गभंगराजितामराधिपांगमुज्ज्वलद्
बालसोमचूडकं भुजंगभूषिताङ्गकम् ।
सङ्गहीनभक्तशीलपालकं जगद्गुरुं
कुन्दमूलमन्दिरस्थमिन्दुचूडमाश्रये ।। ६ ।।

कालकालमम्बुजाक्षनेत्रपूजितांघ्रिकं
कालिमार्द्रकन्धरं कपालशूलधारिणम् ।
मूलकारणं जगत्प्रचालकस्य शङ्करं
कुन्दमूलमन्दिरस्थमिन्दुचूडमाश्रये ।। ७ ।।

कुन्दमूलमृत्तिकामघामयादिमर्दिनीं
सादरं प्रधारकाः प्रभक्षकाश्च ये द्रुतम् ।
आधिपापवर्जितान्विधायकं जनांश्च तान्
कुन्दमूलमन्दिरस्थमिन्दुचूडमाश्रये ।। ८ ।।

आत्मनायकस्तवं महार्थदायकं परं
वातपूःपतीरितं वरिष्ठवाञ्छितप्रदम् ।
भुक्तिमुक्तिकारणं पठेत्सकृच्छिवाग्रतो
यःस एव मुक्तिभाक् शिवाधिकप्रियो भवेत् ।। ९ ।।

*—*—*

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



# योगांबास्तुतिः

(इन्द्रकृता)

देवीं तामरसेक्षणीं गुणमयीं सर्वाशुभद्राविणीं
भक्तानां दुरितार्तिसंघहरिणीं दैत्यौघसंहारिणीम्।
वाणीशादिमुरारिहृद्यभरणीं त्रैलोक्यचूडामणिं
योगाम्बामहमात्मनाथरमणीं ध्यायामि दाक्षायणीम्॥ १ ॥

शान्तां पीनपयोधरातिविनतां पाटीरपङ्काङ्कितां
चेटीभूतसमस्तदेववनितां कादम्बमालावृताम्।
उद्यद्भानुविराजितामगसुतां खेचारिसंसेवितां
योगाम्बामहमात्मनाथवनितां ध्यायामि कुन्दस्थिताम्॥ २

बालां बालजनाभिलाषसफलामाकर्णनेत्रोत्पलां
हेलाभूतसुरावनैकचटुलां नीलाम्बुवाहोज्ज्वलाम्।
आलोलालकभारशोभिनिटिलां वक्षोजतालीफलां
योगाम्बामहमात्मनाथवनितां ध्यायामि कुन्दस्थिताम्॥ ३

गौरीं माधवसोदरीं शुभकरीं सर्वेश्वरीं शाङ्करीं
ह्रींकारीं प्रणतार्तिभंजनकरीं दीनान्नदानेश्वरीम्।
नानारत्नसुवर्णकङ्कणधरीं कुन्दालयाधीश्वरीं
योगाम्बामहमात्मराट्सहचरीं ध्यायामि माहेश्वरीम्॥ ४ ॥

लीलाकल्पितविस्तृतत्रिभुवनां सन्त्रस्तरम्भावनां
ऊरुद्वन्द्वभरात् सुवर्णभवनां क्षीराब्धिमध्यासनाम्।
अस्मद्वाञ्छितदानशीलनयनां भक्तौघसंरक्षणाम्
योगाम्बामहमात्मनाथललनां ध्यायामि चन्द्राननाम्॥ ५

*—*—*

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



# श्रीयोगाम्बाष्टकम्

(रौक्षायणकृम्)

उद्यद्भानुसहस्रकोटिविलसद्देहप्रभोद्भासितां
मुक्ताहारविभूषितामगसुतां कौसुम्भवस्त्रान्विताम्।
हस्तस्थाक्षसुपुस्तकाभयवरां चन्द्रार्धचूडां शिवां
श्रीमत्कुन्दवनालयामनुदिनं ध्यायामि योगाम्बिकाम्॥ १

संफुल्लत्कमलाननां करधृताम्भोजाभयाभीष्टदां
पार्श्वस्थद्विरदेन्द्रवत्ससहितामाकर्णपूर्णेक्षणाम्।
कुम्भाकारकुचातिभारनमितश्रीमध्यभागां शिवां
श्रीमत्कुन्दवनालयामनुदिनं ध्यायामि योगाम्बिकाम्॥ २

तप्तस्वर्णतनुप्रभां दरहसां कल्हारमध्यस्थितां
काञ्चीनूपुरकङ्कणाङ्गदलसद्ग्रैवेयहारोज्ज्वलाम्।
शुण्डादण्डसमानहस्तचतुरां चन्द्रार्धचूडां शिवां
श्रीमत्कुन्दवनालयामनुदिनं ध्यायामि योगाम्बिकाम्॥ ३

दीप्यत्कोमलसत्प्रवाललतिकां चित्रप्रभाभासुरां
मत्तेभापृथुकुम्भसत्कुचनतां पूर्णेन्दुबिम्बाननाम्।
हस्तैश्शूलकपालकार्मुककशान् सम्बिभ्रतीं त्रीक्षणां
श्रीमत्कुन्दवनालयामनुदिनं ध्यायामि योगाम्बिकाम्॥ ४

रक्ताङ्गीं मृगनाभिबिन्दुविलसद्भालेन्दुफालां परां
शोणासृग्वसनां पयोधरनतां काश्मीरपङ्काञ्चिताम्।
हस्तस्थाशुगकार्मुकाङ्कुशकशान् सम्बिभ्रतीं श्रीमतीं
श्रीमत्कुन्दवनालयामनुदिनं ध्यायामि योगाम्बिकाम्॥ ५

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


नानारत्नसुवर्णभूषणगणैराढ्यां सुकौशेयिनीं
वक्षोजस्तबकातिचञ्चललतागात्रीं त्रिणेत्रां पराम्।
हस्तैरिक्षुधनुस्सुमाशुगकशान् सम्बिभ्रतीं शङ्करीं
श्रीमत्कुन्दवनालयामनुदिनं ध्यायामि योगाम्बिकाम्॥ ६

दुग्धाम्भोनिधिमध्यमे सुरतरोर्व्यूहावृते मन्दिरे
चिन्तारत्नमयेऽब्जसम्भवमुखैस्सम्सेव्यमानेऽमरैः।
पञ्चब्रह्ममयेऽतुलेऽतिरुचिरे मञ्चे सुखाध्यासिनीं
श्रीमत्कुन्दवनालयामनुदिनं ध्यायामि योगाम्बिकाम्॥ ७

त्वं माता जनकः शिवो मम गुरुर्दैवं सुहृत्सद्धनं
सर्वेषामपि जीवनं तनुभृतां सर्वैर्मुनीन्द्रैर्भृशम्।
सन्ध्येयं शरणं भवाब्धिपततामन्तर्बहिर्व्यापिनीं
श्रीमत्कुन्दवनालयामनुदिनं ध्यायामि योगाम्बिकाम्॥ ८

मर्त्यो यः पठति स्तवं सुफलदं रौक्षायणर्षीरितं
जिह्वाग्रे निवसेद्धिताय मुदिता ब्राह्मीन्दिरा मन्दिरे।
शर्वाणी हृदयाम्बुजे नृपतयो दासा महीमण्डले
सर्वार्थाननुभूय सर्वमहितं प्रायात् पदं शाङ्करम्॥ ९

*—*—*

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



# श्री शिवपुराम्बाष्टकम्

श्रीवातपुरीशकृतम्

भगवति निरपाये भव्यलावण्यकाये
धुत नतजनमाये वेदशीर्षादिगेये।
शुभगुणसमुदाये मामवाद्याप्रमेये
नमदरिसमवाये श्रीमदात्मेशजाये ॥ १

कुलधरवरबाले कुन्दवृक्षान्तमूले
नुतमुनिवरजाले वह्निकासारकूले।
अरुणरुचिरचेले चित्रकोल्लासिफाले
वरवितरणशीले रक्ष मां योगबाले ॥ २ ॥

मुखरुचिजितसोमे मुग्धचन्द्राभिरामे
दुरितभरितभूमे पूरिताशेषकामे।
रतिनुतिकृतकामे रूपलावण्यसीमे
सुमशररिपुवामे भावना स्यात् सदा मे ॥ ३ ॥

गतिविजितमतंगे भक्तलीलानुषंगे
कुचमुखजितभृंगे मौलिराजद्द्विजांगे।
कलितगिरिशसंगे मुग्धनीलोत्पलांगे
स्मरजनिसदपांगे पाहि कारुण्यतुंगे ॥ ४ ॥

कृतशिवपरितोषां मंजुभाषाविशेषां
मणिरुचिपरिवेषां दिव्यमाधुर्यभाषाम्।
निहतविनतदोषां भक्तरक्षाविशेषां
हृदयदुरितमोषां भावये भीमघोषाम् ॥ ५ ॥

करसरसिजवीणामुद्यदादित्यशोणाम्
दलितरिपुकृपाणां सिंजनीन्यस्तबाणाम्।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


दुरिततिततिशाणामुद्वहत्पुष्पबाणां
कलय ! नरसुराणां कामदानप्रवीणाम् ।। ६ ।।

भुवनततिजनित्रीं बुद्धिनैर्मल्यदात्रीं
सकलशुभभवित्रीमागमाल्याः सवित्रीम् ।
शुभगुणसुचरित्रीं नीलजीमूतगात्रीम्
सुरमुनिनुतिपात्रीं भावये पद्मनेत्रीम् ।। ७ ।।

विषमशरकुलाम्बां विस्तृतोच्चनितम्बां
मुखजितविधुबिंबां विद्रुमाभीष्टबिम्बाम् ।
नतमुनिनिकुरुम्बां तुङ्गवक्षोजकुम्भाम्
श्रय हृदय ! मदम्बां कुन्दवाटीकदम्बाम् ।। ८ ।।

इति शिवपुरदेव्या अष्टकं शिष्टसंपत्-
प्रदमिदमनुवारं यः पठेद्भक्तियुक्तः ।
सकलभुवनमाता योगमाता तु तस्य
चरणनलिनभक्तिं भुक्तिमाद्यां ददाति ।। ९ ।।

## श्रीमदात्मेश्वरतत्त्वपञ्चरत्नम्

(व्यासकृतम्)

षडाधारोर्ध्वसन्निष्ठं षडुत्कर्षस्थलेश्वरम् ।
षट्सभारमणं वन्दे षडध्वाराधनक्षमम् ।। १ ।।

श्रीमत्श्रीकुन्दमूलस्थललसितमहायोगपीठे निषण्णः
सर्वाधारो महात्माऽप्यनुपमितमहास्वादिकैलासवासी ।
यस्यास्ते कामिनी या नतजनवरदा योगमाता महेशी
सोऽव्यादात्मेश्वरो मां शिवपुररमणः सच्चिदानन्दमूर्तिः ।। २

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



यो वेदान्तविचिन्त्यरूपमहिमा यं याति सर्वं जगत्
येनेदं भुवनं भृतं विधिमुखाः कुर्वन्ति यस्मै नमः ।
यस्मात् सम्प्रभवन्ति भूतनिकराः यस्य स्मृतिर्मोक्षकृत्
यस्मिन् योगरतिःशिवेति स महानात्मेश्वरः पातु नः ॥ ३

तुर्यातीतपदोर्ध्वगं गुणपरं सत्तामयं सर्वगं
संवेद्यं श्रुतिशीर्षकैरनुपमं सर्वाधिकं शाश्वतम् ।
ओंकारान्तरबिन्दुमध्यसदनं ह्रींकारलभ्यं नुमो
व्योमाकारशिखाविभाविमुनिसन्दृश्यं चिदात्मेश्वरम् ॥ ४

वेदान्तार्थविचक्षणैरतितरां ब्रह्मेति यः कथ्यतेऽ
प्यन्यैर्योगिजनैर्महापुरुष इत्यष्टाङ्गिभिश्चिन्तितः ।
कैश्चिल्लोकविपत्तिकृत्त्रिनयनःश्रीनीलकण्ठः स्मृतः
तं वन्दे परमात्मनाथमनिशं कुन्दद्रुमाधःस्थितम् ॥ ५ ॥

## मन्त्रराजस्तवः

(धौम्येनोपदिष्टः पुरूरवसे ।)

अस्य श्री मन्त्रराजस्तवस्य ब्रह्मा ऋषिः । अनुष्टुप् छन्दः । श्री आत्मनायको देवता । ओं बीजं, ह्रीं शक्तिः, क्लीं कीलकं, श्री आत्मनाथप्रसादार्थे जपे विनियोगः । ह्रां अङ्गुष्ठाभ्यां नमः । ह्रीं तर्जनीभ्यां स्वाहा । ह्रूं मध्यमाभ्यां वषट् । ह्रैं अनामिकाभ्यां हुम् । ह्रौं कनिष्ठिकाभ्यां वौषट् । ह्रः करतलकरपृष्ठाभ्यां फट् । एवं हृदयादि न्यासः । भूर्भुवस्सुवरोमिति दिग्बन्धः ॥ ध्यानम्-

तुर्यातीतपदोर्ध्वगं गुणपरं सत्तामयं सर्वगं
सम्वेद्यं श्रुतिशीर्षकैरनुपमं सर्वाधिकं शाश्वतम् ।
ओंकारान्तरबिन्दुमध्यसदनं ह्रींकारलभ्यं नुमो
व्योमाकारशिखाविभाविमुनिसन्दृश्यं चिदात्मेश्वरम् ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



लं इत्यादि पञ्चपूजा ॥

ओङ्कारगम्य ओंङ्कारवाच्य ओङ्कारविग्रहः ।
ओङ्कारशुक्तिकामुक्तामणिरोङ्कारवल्लभः ॥ १ ॥

ओङ्कारबिलपञ्चास्य ओङ्कारसुषिरोरगः ।
ओङ्कारपंजरशुक ओङ्कारान्तरवासकः ॥ २ ॥

ओङ्कारनलिनीहंस ओङ्कारावालकन्दरः ।
ओङ्कारसुमसौरभ्य ओङ्कारशमिहव्यवाट् ॥ ३ ॥

ओङ्कारगोक्षीरसर्पिरोङ्काराम्बरभास्करः ।
ओङ्कारदीपसुज्योतिरोङ्कारद्विजराट्सुधा ॥ ४ ॥

ओङ्कारवेदोपनिषदोङ्कारफलसद्रसः ।
ओङ्कारनवमाणिक्यसौधसन्निष्ठभूपतिः ॥ ५ ॥

नगेन्द्रतनयानाथो नानारूपसमन्वितः ।
नवनीलघनश्यामकन्धरो नागकुण्डलः ॥ ६ ॥

नमज्जनामरतरुर्नटनोत्सुकमानसः ।
नागभुग्वाहजनको नक्षत्रेशशिखामणिः ॥ ७ ॥

नवकर्पूरगौराङ्गो नलिनेक्षणसायकः ।
नादबिन्दुकलातीतो नागचर्मोत्तरीयकः ॥ ८ ॥

नागास्यजनको नम्यो नन्दिकेशसमर्चितः ।
नारायणार्चितो नानानिगमोदितमूर्तिमान् ॥ ९ ॥

नारसिंहमहादर्पकदलीवनकुञ्जरः ।
नवन्नवनमल्लोकसंघकारुण्यवार्षिकः ॥ १० ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



नमद्ब्रह्मादिकोटीरनवरत्नोज्ज्वलांघ्रिकः ।
मायातीतो महामायी मनोवाचामगोचरः ॥ ११ ॥

मंजुलाङ्गो महायोगी महामेरुशरासनः ।
मन्मथध्वंसको मौनी मधुधारातिभाषकः ॥ १२ ॥

महीरथो महादेवो महोक्षवरवाहनः ।
माधुर्यजाह्नवीवीचीसम्प्लावितजटातटः ॥ १३ ॥

मनोरथफलातीतवरप्रदपदाम्बुजः ।
महाप्रलयसञ्चारी महाकालो महानटः ॥ १४ ॥

मधुरापुरमध्यस्थविमानान्तरवासकः ।
मार्ताण्डकोटिसदृशो मायापुरनिवासकः ॥ १५ ॥

शिवाकृतिः शिवाकारः शिवानन्दवपुर्धरः ।
शिवाप्रियः शिवाज्ञेयः शिवयोगवनेश्वरः ॥ १६ ॥

शिवाधारः शिवमयः शिवासक्तहृदम्बुजः ।
शिवाङ्गीकृतवामाङ्गः शिवलोकेश्वरः शिवः ॥ १७ ॥

शिवासहायः शिखिदृक्छिखण्डी शिवलोकदः ।
शिवक्षेत्रविलासी च शिखरीन्द्रनिकेतनः ॥ १८ ॥

शिवभक्तहृदम्भोजनिवासी शिवपूःपतिः ।
वाग्मी वरिष्ठो वरदो वाताशविलसत्करः ॥ १९ ॥

वसुप्रदो वासुदेववर्यचक्रायुधप्रदः ।
वरकुन्दद्रुमावासी वटमूलतटाश्रयः ॥ २० ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



वसुन्धरामराकारो वन्द्यो वात्सल्यवारिधिः ।
वामदेवो वर्यवर्यो वराभयकराम्बुजः ॥ २१ ॥

वसुरेता वरेण्यश्च वासवाद्यमरार्चितः ।
वशीकृताखिलाण्डश्च वाक्प्रदो वरदेशिकः ॥ २२ ॥

यज्ञकृद्यज्ञहृद्यज्ञध्वंसी यज्ञेश्वरो यमी ।
यमाद्यष्टाङ्गसन्दृश्यो यन्ता यज्ञविदुत्तमः ॥ २३ ॥

यथेच्छासृष्टभुवनो यथार्थजनवत्सलः ।
यताश्रितजनक्लेशो यज्ञसन्दृश्यविग्रहः ॥ २४ ॥

यमप्रहर्ता यक्षेशसखा यातुगुणान्तकः ।
यज्ञमृग्यो यज्ञसाध्यो यज्ञविश्रान्तिभूरुहः ॥ २५ ॥

यतीशो यतिचित्तारविन्दनृत्तविधायकः ॥ २६ ॥

आत्माऽन्तरात्मा परात्माऽऽदिकैलासनायकः ।
आत्मनाथस्तीर्थनाथः शब्दनाथः सदाशिवः ॥ २७ ॥

अष्टविंशोत्तरशतैरेतैर्नामभिरुज्ज्वलम् ।
अखण्डं मन्त्रराजाख्यस्तवमब्जभवोदितम् ॥ २८ ॥

सकृत् पठित्वा मनुजः श्रुत्वा वा सर्वभोगभुक् ।
सर्वाघौघविनिर्मुक्तः स जीवेच्छरदः शतम् ॥ २९ ॥

*—*—*

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


## ॥ श्री मन्त्रराजनामावलिः ॥

ओंओङ्कारगम्याय नमः। ओङ्कारवाच्याय। ओङ्कारविग्रहाय। ओङ्कारशुक्तिकामुक्तामणये। ओङ्कारवल्लभाय। ओङ्कारबिलपञ्चास्याय। ओंङ्कारसुषिरोरगाय। ओङ्कारपंजरशुकाय। ओङ्कारान्तरवासकाय। ओङ्कारनलिनीहंसाय। ओङ्कारावालकन्दराय। ओङ्कारसुमसौरभ्याय। ओङ्कारशमिहव्यवाहे। ओङ्कारगोक्षीरसर्पिषे। ओङ्काराम्बरभास्कराय। ओङ्कारदीपसुज्योतिषे। ओङ्कारद्विजराट्सुधायै। ओङ्कारवेदोपनिषदे। ओङ्कारफलसद्रसाय। ओङ्कारनवमाणिक्यसौधसन्निष्ठभूपतये नमः ॥ २०।

ओं नगेन्द्रतनयानाथाय नमः। नानारूपसमन्विताय। नवनीलघनश्यामकन्धराय। नागकुण्डलाय। नमज्जनामरतरवे। नटनोत्सुकमानसाय। नागभुग्वाहजनकाय। नक्षत्रेशशिखामणये। नवकर्पूरगौराङ्गाय। नलिनेक्षणसायकाय। नादबिन्दुकलातीताय। नागचर्मोत्तरीयकाय। नागास्यजनकाय। नम्याय। नन्दिकेशसमर्चिताय। नारायणार्चिताय। नानानिगमोदितमूर्तिमते। नारसिंहमहादर्पकदलीवनकुञ्जराय। नवनवनमल्लोकसंघकारुण्यवार्षिकाय। नमद्ब्रह्मादिकोटीरनवरत्नोज्ज्वलांघ्रिकाय नमः ॥ ४० ॥

ओं मायातीताय नमः। महामायिने। मनोवाचामगोचराय। मञ्जुलाङ्गाय। महायोगिने। महामेरुशरासनाय। मन्मथध्वंसकाय। मौनिने। मधुधारातिभाषकाय। महीरथाय। महादेवाय। महोक्षवरवाहनाय। माधुर्यजाह्नवीवीचीसम्प्लावितजटातटाय। मनोरथफलातीतवरप्रदपदाम्बुजाय। महाप्रलयसञ्चारिणे। महाकालाय। महानटाय। मधुरापुरमध्यस्थविमानान्तरवासकाय। मार्ताण्डकोटिसदृशाय। मायापुरनिवासकाय नमः ॥ ६० ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


ओं शिवाकृतये नमः । शिवाकाराय । शिवानन्दवपुर्धराय । शिवाप्रियाय । शिवाज्ञेयाय । शिवयोगवनेश्वराय । शिवाधाराय । शिवमयाय । शिवासक्तहृदम्बुजाय । शिवाङ्गीकृतवामाङ्गाय । शिवलोकेश्वराय । शिवाय । शिवासहायाय । शिखिदृशे । शिखण्डिने । शिवलोकदाय । शिवक्षेत्रविलासिने । शिखरीन्द्रनिकेतनाय । शिवभक्तहृदम्भोजनिवासिने । शिवपूःपतये नमः ॥ ८० ॥

ओं वाग्मिने नमः । वरिष्ठाय । वरदाय । वाताशविलसत्कराय । वसुप्रदाय । वांसुदेववर्यचक्रायुधप्रदाय । वरकुन्दद्रुमावासिने । वटमूलतटाश्रयाय । वसुन्धरामराकाराय । वन्द्याय । वात्सल्य-वारिधये । वामदेवाय । वर्यवर्याय । वराभयकराम्बुजाय । वसुरेतसे । वरेण्याय । वासवाद्यमरार्चिताय । वशीकृताखिलाण्डाय । वाक्प्रदाय । वरदेशिकाय नमः ॥ १०० ॥

ओं यज्ञकृते नमः । यज्ञहृदे । यज्ञध्वंसिने । यज्ञेश्वराय । यमिने । यमाद्यष्टाङ्गसन्दृश्याय । यन्त्रे । यज्ञविदुत्तमाय । यथेच्छासृष्टभुवनाय । यथार्थजनवत्सलाय । यथाश्रितजनक्लेशाय । यज्ञसन्दृश्यविग्रहाय । यमप्रहर्त्रे । यक्षेशसखाय । यातुगुणान्तकाय । यज्ञमृग्याय । यज्ञसाध्याय । यज्ञविश्रान्तिभूरुहाय । यतीशाय । यतिचित्तारविन्दनृत्तविधायकाय नमः ॥ १२० ॥

ओं आत्मने नमः । अन्तरात्मने । परमात्मने । आदिकैलास-नायकाय । आत्मनाथाय । तीर्थनाथाय । शब्दनाथाय । सदाशिवाय नमः ॥ १२८ ॥

*—*—*

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



## श्री आत्मनाथशतनामावलिः

ओं अश्वारूढाय नमः । अखण्डात्मने । अघोरात्मकहृदयाय । अघोरात्मकदक्षिणवदनाय। अघोरात्मने। अजात्मने। अणोरणीयसे। अद्वैताय । अध्यात्मयोगनिलयाय । अनाथनाथाय । अनाथनाथात्मने । अनात्मने । अनाथरक्षकाय । अमेयात्मने । अश्वत्थाय । अष्टधाऽऽत्मस्वरूपाय । आकाशरूपाय । आकाशात्मने । आत्मत्रयशालिने । आत्मत्रय संहर्त्रे नमः ॥ २० ॥

ओं आत्मत्रयपालकाय नमः । आत्माधिपतये । आत्ममन्त्राय । आत्मतन्त्राय । आत्मबोधाय । आततायिने । आत्मानन्दाय । आत्मरूपिणे । आत्मने । आत्मसंभवाय । आत्मयोनये । आत्मज्योतिषे । आत्मभुवे । आत्मजाय । आत्मलिङ्गाय । आदिदेवाय । आधाराय । आनन्दामृताय । आनन्दाय । आनन्दमयाय नमः ॥ ४० ॥

ओं आनन्दपूरिताय नमः । इतिहासाय । इष्टदाय । ईश्वराय । ईशानात्मने । उदकात्मने । ऊर्ध्वरेतसे । ऊर्ध्वलिङ्गाय । ऊहापोहविनिर्मुक्ताय । ऋग्यजुःसामरूपिणे । ऋषये । ऋक्षाय । ऋक्षाणां पतये । एकस्मै । एकाक्षरकाय । ऐं शब्दपरायणाय । ओंकाराय । ओंकाररूपाय । ओंकारनिलयाय । ओंकारमन्त्रवाक्याय नमः ॥ ६० ॥

ओं ओंकाराध्वरदक्षिणात्मने नमः । ओंकारवेदोपनिषदे । ओंकारांभोजचन्द्रमसे । ओंकारकन्दरासिंहाय । कद्रुद्राय । कुन्ददन्ताय । कुन्देन्दुसमप्रभाय । कनकलिङ्गाय । कृपानिधये । कुबेरबन्धवे । कुबेरमित्राय । कामविवर्जिताय । कामनित्यात्मने । गुरवे । गुर्वात्मने । कालाग्निरुद्ररूपाय । कैलासप्रियाय । कैलासाचलवासाय । कैलासवासिने । कैलासपतये नमः ॥ ८० ॥

गणकार्याय नमः । गुणाय । गुणात्मने । गायत्रीतत्पराय । गुरुमन्त्रस्वरूपिणे । गुरुरूपाय । गुरुप्रियाय । चतुर्मुखाय । चतुर्वेदाय । ज्योतिःस्वरूपाय । ज्योतिर्लिङ्गाय । ज्ञानलिङ्गाय । तु(धु)र्याय । तीर्थरताय । देवादिदेवाय । देवतात्मने । पञ्चाक्षरमयाय । परसूक्ष्मात्मने । परमशिवाय । परमलिङ्गाय । परमात्मलिङ्गाय नमः ॥ १०१ ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



# ।। आत्मनाथसहस्रनामावलिः ।।

## (ब्रह्मानन्दसहस्रनामावलिः)

ओं ब्रह्मानन्दाय नमः । आत्मनाथाय । अज्ञानाश्वत्थसाक्षिणे । अग्राह्याय । अत्याज्याय । अगोत्राय । अप(व)र्णाय । अस्थूलाय । अनणवे । अह्रस्वाय । अदिव्याय । अलोहिताय । अनिलाय । अस्नेहाय । अच्छायाय । अविषयाय । अनाकाशाय । अनपेयाय । अशब्दाय । अस्पर्शाय नमः ।। २० ।।

ओं अरूपाय नमः । अरसाय । अरजसे । असमग्राय । अघवते । अचक्षुष्याय । अजिह्वाकाय । अगस्तये । अपापाय । अमनसे । अप्रजापतये । अप्राणाय । अपतृप्याय । अलक्षणाय । अतातप्याय । अगन्तव्याय । अविसर्जितव्याय । अनानन्दयितव्याय । अमन्तव्याय । अचिन्त्याय नमः ।। ४० ।।

ओं अलंघयितव्याय नमः । अबोद्धव्याय । अवृत्तये । अचेतयितव्याय । अनहङ्काराय । अनिन्द्रियाय । अनपानाय । अव्याजाय । अनेकदाय । असमानाय । असंगमाय । अकरणाय । अशरीराय । अनिक्रियाय । असत्वाय । अव्यपदेश्याय । अरजस्काय । अगुणाय । अतपस्काय । अबाधाय (अवायाय) नमः ।। ६० ।।

ओं अनन्नमयाय नमः । अभयाय । अनिर्वचनीयाय । अप्राणमयाय । अविज्ञानमयाय । अमनोमयाय । अनानन्दमयाय । अघोषाय । अव्यञ्जनाय । अस्वराय । अनभिजाताय । अवधूताय । अगोचराय । अचित्राय । असमानाय । अलिङ्गाय । अविशेषणाय । अलौकिकाय । अखण्डाकाराय । अमलाय नमः ।। ८० ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



ओं अदृष्टाय नमः । अनल्पाय । अव्यवहार्याय । अद्वयाय । अनन्ताय । अविद्यारहिताय । अद्वैताय । अबाह्याय । अनन्तराय । अमात्राय । अनन्तमात्राय । अनामधेयाय । अमृताय । अजाय । अकारणाय । अनाभासाय । अनाधाराय । अनाश्रयाय । अशेषवेदान्तवेद्याय । अनिरुक्ताय नमः ॥ १०० ॥

ओं अस्पृश्याय (अपृच्छ्याय) नमः । अव्ययाय । अनाद्यन्ताय । अप्रकृतये । अविक्रियाय । अनामयाय । अप्रमेयाय । अप्रमाणाय । अजिताय । अप्रमात्रे । अनामरूपाय । अननुज्ञाताय । अविकल्पाय । अनुज्ञैकरसाय । अखण्डैकरसाय । अहंब्रह्मास्मिरूपाय । अहंब्रह्मास्मिवर्जिताय । अशुभा(भ)शुभ-संकल्पाय । अणुस्थूलादिवर्जिताय । अन्तरात्मने नमः ॥ १२० ॥

ओं अपरिच्छिन्नाय नमः । अद्वयानन्दाय । अक्रियाय । अविद्याकायरहिताय । अन्तर्यामिणे । अखण्डाकार(श)बोधाय । अवाङ्मनसगोचराय । अखिलाकाराय । अजराय । अकलंकाय । अमराय । अकर्मणे । अखिलनादाय । अखिलातीताय । अक्षयाय । अखिलाण्डस्वरूपाय । अखिलव्यापकाय । अच्छेद्याय । अदाह्याय । अक्लेद्याय नमः ॥ १४० ॥

ओं अशोष्याय नमः । असुराय । अचञ्चलाय । अतिदाय (अतीताय) । अतिशयाय । अविरोधाय । अतिसूक्ष्माय । अधिष्ठानाय । अत्त्रे (अन्त्रे) । अभिन्नाय । अतिसुन्दराय । अघनाशिने । अमलाकाराय । अबोध्याय । अनालस्याय । अनुस्यूताय । अविच्छिन्नाय । अघ(ग)घ्नाय । अनघाय । अन्तःप्र(प्रा)ज्ञाय नमः ॥ १६० ॥

ओं अदृश्याय नमः । अविज्ञेयाय । अहमात्मने । अनीशाय । अहङ्कारविवर्जिताय । असाक्षिणे । अपारसाक्षिणे । असूयाहीनाय ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



अग्निसाक्षिणे । अव्याकृतरहिताय । अव्याकृतसाक्षिणे । अहंकृतिसाक्षिणे । असूयासाक्षिणे । अवच्छिन्नसाक्षिणे । अवच्छिन्नवर्जिताय । अलौकिकपरानन्दाय । अमलाकाशाय । अद्वितीयब्रह्मसंविदे । अविनाशात्मने । अतिवर्णाश्रमाय नमः ॥ १८० ॥

ओं अलक्ष्याय नमः । अन्तरङ्गाय । अक्षताय । अखिलोपाधिनिर्मुक्ताय । अध्यात्मकाय । अनाख्याय । अनभिव्यक्ताय । अभिव्यक्ताय । असत्यानन्दहीनाय । अन्तरादन्तराय । अतीतातीतभावाय । अज्ञानध्वान्तदीपाय । अनन्यभावसुलभाय । अन्यभावसुदूरगाय । अव्याजकरुणामूर्तये । अहेतुकदयांबुधये । अवस्थात्रयहीनाय । अवस्थात्रयसाक्षिणे । अस्मत्प्रत्ययार्थाय । अहमः प्रकृतिसाक्षिणे नमः ॥ २०० ॥

ओं अस्मत्प्रत्ययसाक्षिणे नमः । अहंपदलक्ष्याय । अजकुक्षिस्थितगजसाम्यजगत्साक्षिणे । अखण्डामृततेजाराशये । अहंपरमार्थविषयाय । आदिमध्यान्तसू(शून्या)य । आकाशसदृश्याय । आत्मनाऽऽत्मनि तृप्ताय । आद्यन्तरहिताय । आत्मने । आनन्दाय । आधाराय । आदिकारणाय । आत्मारामाय । आप्तकामाय । आद्यन्ताभावाय । आत्मानन्दरसाय । आद्याय । आत्मभेदविवर्जिताय । आत्माकाराय नमः ॥ २२० ॥

ओं आत्मतीर्थाय नमः । आत्मरूपाय । आकाशशतपूर्णाय । आत्मानन्दप्रकाशाय । आनन्दात्मने । आकाशसाक्षिणे । आत्मशब्दार्थाय । आत्मशब्दहिताय । आनन्दमधु(ज)राय । आदिचैतन्यपात्राय । आत्मशब्दार्थवर्जिताय । आरूढज्ञानिहृदयनिवासाय । आशास्याय । आकाशनैल्यसदृशजगत्साक्षिणे । आशाहृतसुदूराय । आदित्यादिप्रकाशहेतवे । आरूढवेद्याय ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



आत्मानात्मभेदविवर्जिताय। आशाहीनचित्तवेद्याय। आनन्दामृत-सागराय नमः ।। २४० ।।

ओं इष्टानिष्टविहीनाय नमः । इष्टानिष्टाय । इज्यारूपाय । इष्टाय । इच्छाहीनाय । इच्छासाक्षिणे । इन्द्रजालसाम्यलोकैक-साक्षिणे । ईश्वराय । ईप्सिताय । ईप्सितार्थप्रदाय । ईषणादि-विहीनाय । ईशानादिनमस्कृताय । ईक्षणाय । ईन्तरदुःशोधाय । ईदृगिति रहिताय । ईशसाक्षिणे । ईर्ष्याहीनाय । ईर्ष्यासाक्षिणे । ईशानादिशब्दरहिताय। ईषद्विद्युत्साम्यजगत्साक्षिणे नमः ।। २६०

ओं ईशानादिसाक्षिणे नमः । उमारूपाय । उमासाक्षिणे । उमाधिष्ठानाय । उत्तमाय । उद्योगानन्दरहिताय । उपस्थेन्द्रिय-साक्षिणे । उमासहायाय । उपशान्ताय । उच्चनीचविवर्जिताय । उपस्थेन्द्रियहीनाय । उष्णानुष्णविवर्जिताय । उदुंबरफलप्रख्य-भौमलोकैकसाक्षिणे । उदानवायुसाक्षिणे । ऊहापोहविलक्षणाय । ऊर्ध्व(र्ध्वाधो)द्वाराय । ऊर्ध्वाधोगिभागरहिताय । ऊर्ध्वसाम्यजगत्साक्षिणे। ऊर्ध्वाय। ऋताभासिजगत्साक्षिणे नमः ।। २८० ।।

ओं ऋगाद्यागमवेद्याय नमः । एकस्मै । एकान्तसाक्षिणे । एकान्तप्रत्ययात्मने । एकानेकाय । एकसु(सू)प्ताय । एकानेक-विवर्जिताय । एकावस्थामातृजगत्साक्षिणे । एष्टव्याय । एकान्तसन्निहिताय । ऐकाराश्रयाय । ऐकाग्रसाक्षिणे । ऐकाग्रचित्तध्येयाय। ऐकाग्र्यविहीन-सत्यवद्भात जगत्साक्षिणे। ओंकारवाच्याय । ओंकारान्तरार्थाय । ओंकारैकसन्निधये । औदार्याय । औदासीन्याय। औपनिषदाय नमः ।। ३०० ।।

ओं औदासीनैकसाक्षिणे नमः । औदासीन्यप्रकाशकाय । कर्मघ्नाय । केवलाय। कालाय। कामादिरहिताय। कल्याणाय।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


कर्मसाक्षिणे । कल्मषवर्जिताय । कठोरचित्तदूराय । कल्मषापहाय । कालातीताय । कालकालाय । कूटस्थाय । करुणाकराय । कलिदोषविहीनाय। कल्पातीताय । कल्पनारहिताय। कल्पसाक्षिणे । कल्पकवत्स्थिताय नमः ।। ३२० ।।

ओं कार्यकारणनिर्मुक्ताय नमः । करुणानिधये । कार्यकारणरूपाय । करुणातीताय । करुणात्मने । कारणसाक्षिणे । कार्याश्व(न्व)मेधाय। कार्यकारणसाक्षिणे। कूटस्थसाक्षिणे। कृत्स्नाय । कार्योत्पत्तिनाशसाक्षिणे । कामविवर्जिताय । कामसाक्षिणे । क्रोधहीनाय । क्रोधसाक्षिणे। कृतार्थाय। कार्यानन्द(न्त)विहीनाय। कार्यानुतुदाय। कोपहीनाय। कोपसाक्षिणे नमः ।। ३४० ।।

ओं कर्मत्रयविवर्जिताय नमः । कूर्मरोमोपमजगत्साक्षिणे । कर्मविवर्जिताय । कैवल्याय । कालवित्कालाय । कर्माध्यक्षाय । खण्डाण्डविहीनाय । खातौदैकसाक्षिणे । खसदृशाय । खसूक्ष्माय । खेगोल्लासविलाससाक्षिणे । खकुसुमसदृशजगत्साक्षिणे । गुरवे । गम्याय । गणनिधये। गमागमविवर्जिताय। गर्भहीनाय। गर्भसाक्षिणे । गुणानन्तविवर्जिताय। गुरुरूपाय नमः ।। ३६० ।।

ओं गुणातीताय नमः । गुणत्रयसाक्षिणे । गन्तव्यदेशहीनाय । गन्तव्यदेशविवर्जिताय । ग्रामगोचराय। गुह्यागुह्याय। गुरुशिष्य-विहीनात्मने । गुह्यानन्दस्वरूपिणे । गुरुप्रसादलभ्याय । गन्ध-साक्षिणे । गंभीरैकस्वरूपाय। गुहेशाय । गणाधिपाय। गगनसमलोक-साक्षिणे । घ्राणविहीनाय । घ्राणसाक्षिणे । घनमोहतिमिरसूर्याय । घनविक्रमचण्डवाताय। घनाहंकारदूराय। चित्प्रकाशाय नमः ।। ३८०

ओं चैत्यान्न(चैतन्य)बाधरहिताय नमः । चिन्मात्राय । चित्तविवर्जिताय। चितये। चिदात्मने। चैतन्यरूपिणे। चेष्टाहीनाय ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


चित्स्वरूपाय । चेतःसाक्षिणे । चिन्मयाय । चिन्महनीयाय । चतुर्थाय । चतुर्थातीताय । चक्षुःस्रष्ट्रे । चक्षुषे । चिदानन्दाय । चिद्धनाय । चिद्विद्यायै(य) । चित्पराय । चिदानन्दलहर्यै नमः ॥ ४०० ॥

ओं चेतनाचेतनाहीनाय नमः । चैतन्यानन्दसन्दोहाय । चैतन्यदोषविवर्जिताय । चेतनाचेतनाधिष्ठानाय । चिदेकरसाय । चिज्ज्योतिषे । चिद्विलासाय । चैत्यबन्धविवर्जिताय । चिद्ब्रह्मैक्याय । चिदाकाशाय । चिदाकाराय । चिदाकृतये । चिदाभासविहीनाय । चिन्तनातीताय । चैत्यवर्जितचिन्मात्राय । चित्तसाक्षिणे । चिदाभाससाक्षिणे । चिन्तानाशाय । चैतन्यमात्र संसा(सि)ध्याय । चित्प्रतिबिंबिताय नमः ॥ ४२० ॥

ओं चित्रतुल्यजगत्साक्षिणे नमः । चित्रप्रतिभासकाय । छान्दोग्योपनिषत्प्रतिपाद्याय । छन्दःस्वरूपाय । छन्दःसाराय । छन्दःस्वरूपाय । जन्महीनाय । ज्योतिर्मयाय । ज्यायसे । ज्योतिषांज्योतिषे । ज्वरनाशविहीनाय । जरामरणवर्जिताय । जनरूपाय । जयाय । जाग्रत्कल्पनारहिताय । जपाय । जप्याय । जगज्ज्योतिषे । जगज्जारा(ला)दिकारणाय । जगद्व्याप्याय नमः ॥ ४४० ॥

ओं जगन्नाथाय नमः । जगत्सृष्टिविवर्जिताय । जगदधिष्ठानाय । जीवाय । जन्मविनाशकाय । जगज्ज्ञान-विहीनाय । जीवत्वरहिताय । जलस्थपद्मसाम्यजगत्साक्षिणे । जीवभावरहिताय । जीवाधिष्ठानाय । जिह्वारहिताय । जीव-साक्षिणे । जनहृदयसाक्षिणे । जीवाधाराय । जीवाभिमानर-हिताय । जीव्यसाक्षिणे । जनातीताय । जीवचेष्टाविवर्जिताय । जीवावस्थासाक्षिणे । जगद्विलक्षणाय नमः ॥ ४६० ॥

Digitization by Hindu Heritage Foundation of America. HHFA(USA)

ओं जगत्साक्षिणे नमः । जीवेश्वरजगत्साक्षिणे । जगदन्तर्गताय । जाग्रत्कल्पनासाक्षिणे । जीवेश्वरजगत्स्थितये । झङ्कारादिशब्दसाक्षिणे । ज्ञाननिष्कलरूपिणे । ज्ञानाज्ञानस्वरूपाय । ज्ञानाज्ञानविवर्जिताय । ज्ञानरूपाय । ज्ञानवेद्याय । ज्ञानानन्दप्रकाशाय । ज्ञानज्ञेयस्वरूपाय । ज्ञानिनां सुदुर्लभाय । ज्ञानाज्ञानसाक्षिणे । ज्ञानहीनसुदुर्लभाय । ज्ञानहीनचोराय । ज्ञानगम्याय । ज्ञान्यज्ञानिचित्तसाक्षिणे । ज्ञानाज्ञानतस्कराय नमः ॥ ४८०

ओं टापहीनाय नमः । टापसाक्षिणे । टापाटापविवर्जिताय । तत्त्वात्मने । तस्मै । तुभ्यं । तत्पराय । तन्मयाय । तत्त्वाय । तत्त्वस्वरूपाय । तत्त्वातत्त्वविवर्जिताय । तुषानलाग्नितत्त्वस्वरूपाय । तत्त्वमर्थस्वरूपिणे । तेजःस्वरूपाय । ताराय । तुर्यातीताय । तारकाय । तत्पदलक्ष्याय । तुर्याय । तारकमन्त्रार्थरूपाय नमः ॥ ५०० ॥

ओं तूलभस्मसाम्यजगत्साक्षिणे नमः । तत्त्वसाक्षिणे । तत्त्वमस्यादिमहावाक्यवेद्याय । तापत्रयातीताय । त्रिपुटीसाक्षिणे । तारकब्रह्मणे । तेजोराशये । तैजससाक्षिणे । दिव्याय । दोषहीनाय । दृग्रूपाय । दर्भसाक्षिणे । द्रोहसाक्षिणे । द्रोहहीनाय । दर्पहीनाय । दिगंबराय । देवादिदेवाय । दमनिश्चयाय । देवशिखामणये । देशकालवस्तुपरिच्छेदनाय नमः ॥ ५२० ॥

ओं दम(टे)बोधाय नमः । दिव्यचक्षुषे । दिव्यज्ञानप्रदाय । दिव्यसंपूज्यरहिताय । दिव्यलक्षणाय । दृढनिश्चयहृद्द्योत्याय । दृढ(दीप)चित्तैकलभ्याय । देशकालवस्तुपरिच्छेदवर्जनाय । द्रष्टृदर्शनदृश्यनिर्मुक्ताय । दीप्तये । धन्यानां सुलभाय । धराय । धर्माधर्मविवर्जिताय । धीराय । धरायै । ध्रुवाय । धैर्याय । धीरलभ्याय । धाम्ने । ध्यातृध्यानध्येयरूपाय नमः ॥ ५४० ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


ओं धूतसंसारबन्धाय नमः । ध्यतृध्यानविहीनाय । धीसाक्षिणे । ध्येयवर्जिताय । ध्यातृध्यानसाक्षिणे । धीवेद्याय । ध्यानाय । धात्रे । ध्येयाय । ध्येयध्यातृध्यानकल्पनाधिष्ठनाय । निर्वाणाय । निरीहाय । निरीप्सिताय । नित्याय । निरवद्याय । निष्क्रियाय । निरंजनाय । निर्मलाय । निर्विकल्पाय । निराभाना(सा)य नमः ॥ ५६० ॥

ओं निश्चलाय नमः । निर्विकाराय । नित्यव्रताय । निर्गुणाय । निस्सहाय । निरिन्द्रियाय । नियन्त्रे । निरपेक्षाय । निष्कलाय । निराकृतये । निरालंबाय । निजरूपाय । निरामयाय । निष्टेष्टानिष्टकलनाय । नाथाय । नित्यमङ्गलाय । निदानाय । नित्यतृप्ताय । निरावरणाय । निरूपस्वरूपाय नमः ॥ ५८० ॥

ओं निस्सहाय(ाय) नमः । निरुपाधिकाय । नित्यप्रकाशाय । निश्चिन्ताय । निर्लक्ष्याय । निरन्तराय । नामरूपविहीनात्मने । नियोनये । निर्भयाय । निष्कलात्मने । नायकाय । निवेद्याय । निरास्पदाय । निर्या(र्वा)णेत्यादिवाच्याय । निर्बन्धाय । निरुपप्लवाय । निर्मलात्मने । निरानन्दाय । नादान्तज्योतिषे । निरंकुशस्वरूपाय नमः ॥ ६०० ॥

ओं नेतिनेतिवाक्यावयसे नमः । नरशृङ्गोपमजगत्साक्षिणे । नित्यचिद्घनाय । निष्प्रपञ्चपराय । निष्प्रपञ्चग्रहाय । निष्प्रपञ्चाघननाकस्य सूचकाय । निर्लेपाय । निष्प्रपञ्चछत्रयुक्ताय । निष्प्रपञ्चासनस्थिताय । निष्प्रपञ्चमहामालाय । निष्प्रपञ्चात्मचन्दनाय । निष्प्रपञ्चप्रभूषणाय । निष्प्रपञ्चसुतांबूलाय । निष्प्रपञ्चसुखस्थिराय । निष्प्रपञ्चमहद्धाम्ने । निष्प्रपञ्चशिवाकाराय । निष्प्रपञ्चजलस्नानाय । निष्प्रपञ्चकतर्पणाय । निष्प्रपञ्चमहामन्त्रिणे । निष्प्रपञ्चजपाय नमः ॥ ६२०

Digitization by Hindu-Heritage Foundation of America. HHFA(USA)


ओं निष्प्रपञ्चगजारूढाय नमः । निष्प्रपञ्चाश्ववाहनाय । निष्प्रपञ्चमहाराज्याय । निष्प्रपञ्चयुतादिमते । निष्प्रपञ्चमहादेवाय । निष्प्रपञ्चात्मभावनाय । निष्प्रपञ्चमहानिद्राय । निष्प्रपञ्चस्वभावकाय । निष्प्रपञ्चजीवात्मने । निष्प्रपञ्चकलेवराय । निष्प्रपञ्चपरीवाराय । निष्प्रपञ्चनित्योत्सवाय । निष्प्रपञ्चककल्याणाय । निष्प्रपञ्चकतर्पणाय । निष्प्रपञ्चकाराध्याय । निष्प्रपञ्चकविचारणाय । निष्प्रपञ्चविहाराद्याय । निष्प्रपञ्चप्रदीपाय । निष्प्रपञ्चप्रपूर्णाय । निष्प्रपञ्चारिमर्दनाय नमः ॥ ६४०

ओं प्राणानन्दैकबोधनाय नमः । प्रत्यगेकैकरसाय । प्रज्ञानाय । प्रसन्नाय । प्रकाशाय । परमेश्वराय । परमाय । परमात्मने । प्रणवान्तर्गताय । परिपूर्णाय । परापरविवर्जिताय । प्रपञ्चरहिताय । प्रज्ञाय । प्रज्ञानघनाय । प्रज्ञानाय । परमानन्दाय । पश्यते । पुरुषोत्तमाय । परायै काष्ठायै । परगुरवे नमः ॥ ६६० ॥

ओं प्रत्यक्षाय नमः । परमाद्भुताय । प्रज्ञानाय । परस्मै ज्योतिषे । पशुपाशविमोचनाय । पराकाशाय । पशुपतये । पञ्चनदेश्वराय । परिपूर्णज्ञानाय । पञ्चनदस्वरूपिणे । पञ्चकोश-स्वरूपाय । पूर्णानन्दैकविग्रहाय । परब्रह्मणे । परशिवाय । परप्रेमास्पदाय । प्रत्यक्चितये । परस्मै धाम्ने । परापरज्ञानशूराय । पञ्चब्रह्मस्वरूपिणे । प्रपञ्चोपशमनाय नमः ॥ ६८० ॥

ओं परमार्थज्ञानाय । प्रसन्नाय । परदैवताय । पञ्चावस्था-साक्षिवर्जिताय । पञ्चप्रेतासनाय । पञ्चप्राणस्वरूपाय । प्रणवार्थस्वरूपिणे । प्रपञ्चसाक्षिणे । प्ररूढाय । परत्रयविलक्षणाय । पञ्चेन्द्रियस्वरूपाय । पञ्चावस्थाविलंघिताय । प्रत्यक्परोक्षरहिताय । पञ्चकोशादिसाक्षिणे । पञ्चकोशाधिष्ठानाय । पञ्चकोशान्तर-स्थिताय । परमार्थैकवेद्याय । पुण्यापुण्यविवर्जिताय । परिशुद्धाय । परब्रह्मणे नमः ॥ ७०० ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


ओं प्रणवैकस्वरूपिणे नमः । परमार्थाय । परगतये । प्रभवे । प्राणाय । प्रत्यगभिन्नब्रह्मणे । परसच्चित्सुखात्मकाय । प्रपञ्चनिर्मुक्ताय । पावनाय । परवस्तुने । प्रज्ञाय । परमसुखदाय । पुण्याय । पापविनाशनाय । परमाय पदाय । पुंसे । पुरारये । परमकृपाकराय । पुण्यलभ्याय । पुष्कलाय नमः ॥ ७२० ॥

ओं परमोदाराय नमः । प्रियात्मने । प्राणनायकाय । पुण्यापुण्यस्वरूपाय । पूर्णाय । परमसाम्याय । पूर्वपुण्यैकलभ्याय । पारमार्थिकविवर्जिताय । परगांभीर्यवते । पूर्वपुण्यहीनसुदुर्लभाय । पुरत्रयसाक्षिणे । पुरत्रयरूपाय । परमामृतधाम्ने । परोन्नतिमते । परमसन्तोषाय । परनिर्वाणतृप्तये । प्रातिभासिकहीनाय । प्रातिभासिकसाक्षिणे । पुरातीताय । प्राज्ञसाक्षिणे नमः ॥ ७४०

ओं प्राज्ञहीनाय नमः । प्रतिबन्धत्रयीहीनाय । पादेन्द्रियसाक्षिणे । पद्मपत्रजलप्रायजगतीसाक्षिणे । पाय्विन्द्रियादिसाक्षिणे । प्राज्ञतैजस-वर्जिताय । फाललोचनादिसाक्षिणे । ब्रह्मविद्यायै । बृहद्रूपाय । बलिने । ब्रह्मविवर्जिताय । ब्रह्मविप्रज्ञाय । ब्रह्मविद्यासंप्रदायरक्षकाय । बृहत्कोशाय । ब्रह्मणे । ब्रह्मचैतन्याय । बलप्रदाय । ब्रह्मज्ञानैकलभ्याय । बन्धमोक्षविवर्जिताय । ब्रह्मज्ञानतोयाय नमः ॥ ७६० ॥

ओं ब्रह्माधिपतये नमः । ब्रह्मानन्दाय । ब्रह्मानन्दरम्याय । ब्रह्मात्मकाय । ब्रह्माकारवृत्तिविषयाय । ब्रह्मसंस्थिताय । ब्रह्मज्ञानस्वरूपाय । ब्रह्मविद्रूपाय । ब्रह्मविदे । ब्रह्मरूपाय । भवचक्रप्रवर्तकाय । भाग्यलभ्याय । भागधेयाय । भूमानन्द-स्वरूपिणे । भूतपतये । भूम्ने । भवरोगचिकित्सकाय । भावाभाव-कलाहीनाय । भगवते । भवमोचकाय नमः ॥ ७८०

ओं भवध्वंसकाय नमः । भारूपाय । भीतिनिवर्तकाय । भोक्तृभोज्यभोगरूपाय । भावनालंघिताय । भाववर्जित-चिन्मात्राय ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


भाषाहीनाय । भोक्तृभोग्यभोगसाक्षिणे । भ्रमाविष्टाय । भृष्टबीजसदृशजगत्साक्षिणे । भवहीनाय रम्यप्रध्वंसिने । महाकाशाय रम्यमहते । महाकर्त्रे । महाभोक्त्रे । महात्यागिने रम्यमहामुनये । मुक्तामुक्तस्वरूपात्मने । मुक्तामुक्तविवर्जिताय । महात्मने । महादेवाय । महर्षये नमः ॥ ८०० ॥

ओं मूलकारणाय नमः । महानन्दाय । मनोऽतीताय । मूलाज्ञानविनाशनाय । महानन्दभावाय । मायाभासविवर्जिताय । महाग्रासाय । महत्सेव्याय । महामोहविनाशनाय । महर्षिप्रज्ञाय । मोक्षात्मने । मूलचैतन्याय । मोक्षामोक्षस्वरूपाय । मिथ्यानन्दप्रकाशकाय । महावाक्यलक्ष्याय । महावाक्यार्थरूपिणे । महत्पदाय । महामूर्तये । महच्छब्दविवर्जिताय । मूलस्वरूपाय नमः ॥ ८२० ॥

ओं मोचकैकस्वरूपिणे नमः । महाशब्दात्मकाय । मायाहीनाय । मनोहराय । मायाधिष्ठानाय । मायिने । मायावशंकराय । मायानुताय । मध्यगताय । मूर्खचित्तसुदुर्लभाय । मायावश्याय । महच्चित्तसुलभाय । माधवाय । मायातत्कार्यसाक्षिणे । मात्सर्यादिविवर्जिताय । मध्यस्थाय । मन्त्रसाध्याय । महाप्रलयसाक्षिणे । माणिक्यवत्स्वयंज्योतिषे । मनःसाक्षिणे नमः ॥ ८४० ॥

ओं महासिद्धये नमः । मात्सर्यसाक्षिणे । मात्सर्यविहीनाय । मोहहीनाय । मदविवर्जिताय । मोहसाक्षिणे । महामायाविने । महत्साक्षिणे । मृगतृष्णासदृशजगदधिष्ठानाय । मलरहिताय । मायाप्रतिबिंबितसाक्षिणे । मानहीनाय । याजमान्यविहीनाय । यज्ञरूपाय । यजमानाय । योगरूपाय । योगविधिस्वरूपाय । यजनयाजनरूपाय । यजनयाजनसाक्षिणे । रागहीनाय नमः ॥ ८६० ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



ओं रागसाक्षिणे नमः । रम्याय । रूपप्रसाक्षिणे । रज्जुसर्पजगत्साक्षिणे । रससाक्षिणे । रसाय । लक्ष्यालक्ष्यस्वरूपाय । लक्ष्यालक्ष्यविवर्जिताय । लाभवृद्धिविवर्जिताय । लक्ष्याय । लक्ष्यालक्ष्यसाक्षिणे । लोभसाक्षिणे । लक्षणत्रयविज्ञानाय । लयहीनाय । वृत्तिशून्यसुखात्मने । वयोऽवस्थाविवर्जिताय । विश्वातीताय । विश्वसाक्षिणे । वर्णाश्रमविवर्जिताय । विष्णवे नमः ॥ ८८० ॥

ओं वरेण्याय नमः । विज्ञानाय । विरजसे । विश्वतोमुखाय । वासुदेवाय । विमुक्ताय । विदिताविदितात्पराय । विकल्पाविकल्पसाक्षिणे । विकल्पसाक्षिणे । विज्ञानविष्वग्ज्ञानाय सच्चिदानन्दाय । विद्वज्ज्ञेयाय । वृत्तिशून्याय । वृत्तिवेद्याय । विषयानन्दवर्जिताय । वृत्तिकल्पनाधिष्ठानाय । वाक्साक्षिणे । वेदरूपिणे । वास(ही)नाय । वेदान्तवेद्याय । वेदैकस्वरूपिणे नमः ॥ ९००

ओं वचनहीनाय नमः । वचनसाक्षिणे । वृष्टिसाक्षिणे । विराट्स्वरूपाय । विदुषे । व्यष्टिविवर्जिताय । विराड्भावरहिताय । विकल्पदूराय । विराट्साक्षिणे । विश्वचक्षुषे । विश्वहीनाय । विश्वात्मने । वन्ध्यासुतसदृशजगत्साक्षिणे । विशुद्धरूपाय । शुद्धाय । शक्राय । शान्ताय । शाश्वताय । शिवाय । शून्यविहरणाय नमः ॥ ९२० ॥

ओं शोभनाशोभमानाय नमः । शंकराद्वैतवन्द्याय । शुद्धाशुद्धविवर्जिताय । शुक्तिरूप्यसाम्यजगत्साक्षिणे । श्रेयसे । श्रेष्ठिने । शुभ्राय । शून्याय । शंकराय । शब्दब्रह्मणे । शरदाकाशसदृशाय । शुद्धचैतन्यरूपिणे । शैवागमविदे शिवाय । शशाङ्कतुल्यजगत्साक्षिणे सच्चिदात्मकाय । षडाधारस्वरूपाय । षट्कोशरहिताय । षड्र्मिवर्जिताय । षडाधारविलंघिताय । षट्शास्त्रलंघिताय । षण्मतातीताय नमः ॥ ९४० ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



ओं षडाधारसाक्षिणे नमः । षट्शास्त्रैकरहस्यविदे । सदसद्भेदहीनाय । संकल्परहिताय । सदाविचाररूपाय । सर्वेन्द्रियविवर्जिताय। सर्वाय। सच्चिदानन्दाय। साक्ष्यसाक्षित्ववर्जिताय । सर्वप्रकाशरूपाय। सर्वसंबन्धवर्जिताय । संभेदरूपाय । सर्वभूतान्तरस्थिताय । सर्वेश्वराय। सर्वसाक्षिणे। सर्वानुभूताय। सुखस्वरूपाय। साक्षिहीनाय। सदाशिवाय। सदोदिताय नमः ॥ ९६० ॥

ओं सर्वकर्त्रे नमः । सर्वगाय। सनातनाय। सन्मात्राय। सद्घनाय। सर्वव्यापिने। सर्वविलक्षणाय। सर्वातीताय। सर्वभर्त्रे। सर्वस्तोत्रविवर्जिताय । सुखातीताय। सुखारंभाय। स्वभापाय। सुखवारिधये । सुखलयाय। स्वयंज्योतिषे। सर्वत्रावस्थिताय। स्वयंभुवे। संसारहेतवे। स्वभाय नमः ॥ ९८० ॥

ओं संकल्पसाक्षिणे नमः । सर्वशान्ताय। सर्वशक्ताय। स्वतन्त्राय । सर्वशक्तिमते । स्थूलसाक्षिणे । सूक्ष्मसाक्षिणे । स्वप्नकल्पितवर्जिताय । समानसाक्षिणे । स्वरूपानन्दाय । स्पर्शसाक्षिणे । स्वप्नकल्पनासाक्षिणे । समष्टिरहिताय । समष्टिव्यष्टिहीनाय । सत्तामात्रस्वरूपिणे । सुषुप्तिकल्पनाहीनाय । सर्वकर्मकर्त्रे । सुषुप्तिकल्पनासाक्षिणे । सच्चिदानन्दवर्जिताय । सर्वानुभवरूपाय नमः ॥ १०००

ओं सर्वानुभवसाक्षिणे नमः । समग्राग्रगुणाधारसत्यलीलाय । सर्वसंकल्परहिताय । सर्वसंकल्पसाक्षिणे । सर्वसंज्ञाविहीनाय । सर्वसंज्ञाति(ज्ञप्ति)साक्षिणे। सांख्यवित्पूर्णाय। सर्वशक्त्युपबृंहिताय । सुरवासनाय । स्वयंब्रह्मणे । सर्वपापशमाय । संशान्तदुःखाय । सिद्धान्तरहस्याय । सर्वगोचराय । सर्वसंकल्पजालशून्याय ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



सुखात्सुखाय । सर्वकल्पनातीताय । साक्षिनुताय । स्वानन्दाय । सर्वंवित्सर्वाय नमः ॥ १०२० ॥

ओं सर्ववाक्यविवर्जिताय नमः । सकलनिष्कलरूपाय । सकलनिष्कलसाक्षिणे । सर्वप्रकृतिविहीनात्मने । सर्वसिद्धिविवर्धनाय । सर्वशास्त्रार्थसिद्धान्ताय । सर्वसंपूर्णविग्रहाय । स्वानुभूत्येकमानाय । सर्वचित्तानुगाय । स्वप्नतुल्यजगत्साक्षिणे । सर्वकृते । सूक्ष्मधिये । समाय । समरससाराय । सर्वमननफलाय । सकृद्विभाना(ता)य । संशान्ताय । सूक्ष्माय । सङ्गहीनाय । सर्वप्रत्ययसाक्षिणे नमः ॥ १०४०

ओं सर्वान्तरङ्गाय नमः । सुसन्तुष्टाय । सर्वप्रत्ययवर्जिताय । स्वप्रकाशाय । सदानन्दाय । सर्वप्राणिमनोहराय । साधुप्रियाय । साधुप्रज्ञाय । स्वाद्वस्वादुविवर्जिताय । स्वाद्वस्वादुप्रदीपकाय । सर्वज्ञाय । सर्वसंपूर्णाय । सर्वसन्तोषसाक्षिणे । संसारार्णवनिर्मुक्त-समुद्धरणकौशलाय । स्वात्मानन्दकणीभूतब्रह्माद्यानन्दसन्ततये । हस्तहीनाय । हिरण्यगर्भसाक्षिणे । हिरण्यगर्भरूपाय । हेयोपादेयवर्जिताय । हंसमन्त्रार्थरूपाय नमः ॥ १०६० ॥

ओं हर्षशोकप्रसाक्षिणे नमः । हंसाय । हंसभावनाय । क्षुद्र(क्षंत्र)जगत्साक्षिणे । क्षराक्षरविवर्जिताय । क्षान्तिमच्चित्तसुलभाय । क्षान्तिहीनसुदूराय । क्षेत्रज्ञाय । क्षेत्रस्वरूपिणे । क्षेत्राधिष्ठानाय । विष(षु)वल्लोकसाक्षिणे । क्षान्ताय ॥ (१०७२)

ओं ब्रह्मानन्दस्वामिने नमः । आत्मानन्दस्वामिने नमः । अश्वनाथस्वामिने नमः ।

*—*—*

பரிசு தீட்டை



பூவார் அடிச்சுவடு பொறித்தல்

நயன தீட்சையும் உபதேசமும்

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



# योगनायिकासहस्रनामस्तोत्रम्

## (राजराजेश्वरीसहस्रनामस्तोत्रम्)

## (राकारादिरकारान्ताद्याक्षरघटितम्

राजराजेश्वरी राजरक्षकी राजनर्तकी।
राजविद्या राजपूज्या राजकोशसमृद्धिदा ॥ १

राजहंसतिरस्कारिगमना राजलोचना।
राज्ञां गुरुवराराध्या राजयुक्तनटाङ्गना ॥ २

राजगर्भा राजकन्दकदलीसक्तमानसा।
राज्ञां कविकुलाख्याता राजरोगनिवारिणी ॥ ३

राजौषधिसुसम्पन्ना राजनीतिविशारदा।
राज्ञां सभालङ्कृताङ्गी राजलक्षणसंयुता ॥ ४

राजद्बला राजवल्ली राजत्तिल्ववनाधिपा।
राजसद्गुणनिर्दिष्टा राजमार्गरथोत्सवा ॥ ५

राजचक्राङ्कितकरा राजांशा राजशासना।
राजत्कृपा राजलक्ष्मीः राजत्कञ्चुकधारिणी ॥ ६

राजाहङ्कारशमना राजकार्यधुरन्धरा।
राजाज्ञा राजमातङ्गी राजयन्त्रकृतार्चना ॥ ७

राजक्रीडा राजवेश्मप्रवेशितनिजाश्रिता।
राजमन्दिरवास्तव्या राजस्त्री राजजागरा ॥ ८

राजशापनिविर्मुक्ता राजश्री राजमन्त्रिणी।
राजपुत्री राजमैत्री राजान्तःपुरवासिनी ॥ ९

राजपापविनिर्मुक्ता राजर्षिपरिसेविता।
राजोत्तममृगारूढा राज्ञस्तेजःप्रदायिनी ॥ १०

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



राजार्चितपदाम्भोजा राजालङ्कारवेष्टिता ।
राजसूयसमाराध्या राजसाहस्रसेविता ॥ ११

राजसन्तापशमनी राजशब्दपरायणा ।
राजार्हमणिभूषाढ्या राजच्छृङ्गारनायिका ॥ १२

राजद्रुमूलसंराजद्विघ्नेशवरदायिनी ।
राजपर्वतकौमारी राजशौर्यप्रदायिनी ॥ १३

राजाभ्यन्तःसमाराध्या राजमौलिमनस्विनी ।
राजमाता राजमाषप्रियार्चितपदाम्बुजा ॥ १४

राजारिमर्दिनी राज्ञी राजत्कल्हारहस्तका ।
रामचन्द्रसमाराध्या रामा राजीवलोचना ॥ १५

रावणेश समाराध्या राकाचन्द्रसमानना ।
रात्रिसूक्तजपप्रीता रागद्वेषविवर्जिता ॥ १६

रिङ्खन्नूपुरपादाब्जा रिट्यादिपरिसेविता ।
रिपुसङ्घकुलध्वान्ता रिगमस्वरभूषिता ॥ १७

रुक्मिणीशसहोद्भूता रुद्राणी रुरुभैरवी ।
रुग्घन्त्री रुद्रकोपाग्निशमनी रुद्रसंस्तुता ॥ १८

रुषानिवारिणी रूपलावण्याम्बुधिचन्द्रिका ।
रूप्यासनप्रिया रूढा रूप्यचन्द्रशिखामणिः ॥ १९

रेफवर्णगला रेवानदीतीरविहारिणी ।
रेणुका रेणुकाराध्या रेवोर्ध्वकृतचक्रिणी ॥ २०

रैणुकेयाख्यकल्पोक्तयजनप्रीतमानसा ।
रोमलम्बितविध्यण्डा रोमन्थमुनिसेविता ॥ २१

रोमावलिसुलावण्यमध्यभागसुशोभिता ।
रोचनागरुकस्तूरीचन्दनश्रीविलेपिता ॥ २२

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



रोहिणीशकृतोत्तंसा रोहिणीपितृवन्दिता।
रोहिताश्वसुसंभूता रौहिणेयानुजार्चिता ॥ २३

रौप्यसिंहासनारूढचाक्षुष्मन्मन्त्रविग्रहा।
रौद्रमन्त्राभिषिक्ताङ्गी रौद्रमध्यसमीडिता ॥ २४

रौरवान्तकरी रौच्यपत्रपुष्पकृतार्चना।
रङ्गलास्य कृतालोला रङ्गवल्ल्याद्यलङ्कृता ॥ २५

रञ्जक श्रीसभामध्य गायकान्तरवासिनी।
ललिता लड्डुकप्रीतमानसस्कन्दजन्मभूः ॥ २६

लकारत्रययुक्त श्रीविद्यामन्त्रकदम्बका।
लक्षणा लक्षणाराध्या लक्षबिल्वार्चनप्रिया ॥ २७

लज्जाशीला लक्षणज्ञा लकुचान्नकृतादरा।
ललाटनयनार्धाङ्गी लवङ्गत्वक्सुगन्धवाक् ॥ २८

लाजहोमप्रिया लाक्षागृहे कौन्तेयसेविता।
लाङ्गली लालना लाला लालिका लिङ्गपीठगा ॥ २९

लिपिव्यष्टिसमष्टिज्ञा लिपिन्यस्त त्रिणेत्रभृत्।
लुङ्गाफलसमासक्ता लुलायासुरघातुकी ॥ ३०

लूतिकापतिसंपूज्या लूताविस्फोटनाशिनी।
लृलॄवर्णस्वरूपाढ्या लेखिनी लेखकप्रिया ॥ ३१

लेह्यचोष्यपेयखाद्यभक्ष्यभोज्यादिमप्रिया।
लेपितश्रीचन्दनाङ्गी लैङ्गमार्ग प्रपूजिता ॥ ३२

लोलम्बिरत्नहाराङ्गी लोलाक्षी लोकवन्दिता।
लोपामुद्रार्चितपदा लोपामुद्रापतीडिता ॥ ३३

लोभकामक्रोधमोह मदमात्सर्यवारिता।
लोहजप्रतिमायन्त्रवासिनी लोकरञ्जिनी ॥ ३४

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


लोकवेद्या लोलडोलास्थितशम्भुविहारिणी।
लोलजिह्वापरिताङ्गी लोकसंहारकारिणी॥ ३५

लौकिकीज्याविदूरस्था लङ्केशानसुपूजिता।
लम्पटा लम्बिमालाभिनन्दिता लवलीधरा॥ ३६

वक्रतुण्डप्रिया वज्रा वधूटी वनवासिनी।
वधूर्वचनसन्तुष्टा वत्सला वटुभैरवी॥ ३७

वटमूलनिवासार्धा वरवीराङ्गनावृता।
वनिता वर्धनी वर्ष्या वरालीरागलोलुपा॥ ३८

वलयीकृतमाहेशकरसौवर्णकन्धरा।
वराङ्गी वसुधा वप्रकेलिनी वणिजा(जां)वरा॥ ३९

वपुरायितश्रीचक्रा  वरदा वरवर्णिनी।
वराहवदनाराध्या वर्णपञ्चदशात्मिका॥ ४०

वसिष्ठाच्र्या वल्कलान्तर्हितरम्यस्तनद्वयी।
वशिनी वल्लकी वर्णा वर्षाकालप्रपूजिता॥ ४१

वल्ली वसुदलप्रान्तवृत्तकट्याश्रितादरा।
वर्गा वरवृषारूढा वषण्मन्त्रसुसंज्ञका॥ ४२

वलयाकारवैडूर्य वरकङ्कणभूषणा।
वज्राञ्चितशिरोभूषा वज्रमाङ्गल्यभूषिता॥ ४३

वाग्वादिनी वामकेशी वाचस्पतिवरप्रदा।
वादिनी वागधिष्ठात्री वारुणी वायुसेविता॥ ४४

वात्स्यायनसुतन्त्रोक्ता वाणी वाक्यपदार्थजा।
वाद्यघोषप्रिया वाद्यवृन्दारम्भनटोत्सुका॥ ४५

वापीकूपसमीपस्था वार्ताली वामलोचना।
वास्तोष्पतीड्या वामाङ्घ्रिधृतनूपुरशोभिता॥ ४६

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


वामा वाराणसीक्षेत्रा वाडबेयवरप्रदा।
वामाङ्गा वाञ्छितफलदात्री वाचालखण्डिता ॥ ४७
वाच्यवाचकवाक्यार्था वामना वाजिवाहना।
वासुकीकण्ठभूषाढ्यवामदेव प्रियाङ्गना ॥ ४८
विजया विमला विश्वा विग्रहा विधृताङ्कुशा।
विनोदवनवास्तव्या विभक्ताण्डा विधीडिता ॥ ४९
विक्रमा विषजन्तुघ्नी विश्वामित्रवरप्रदा।
विश्वम्भरा विष्णुशक्तिर्विजिज्ञासा विचक्षणा ॥ ५०
विटङ्कत्यागराजेन्द्रपीठसंस्था विधीडिता।
विदिता विश्वजननी विस्तारितचमूबला ॥ ५१
विद्या विनयसम्पन्ना विद्याद्वादशनायिका।
विभाकरात्यर्बुदाभा विधात्री विन्ध्यवासिनी ॥ ५२
विरूपाक्षसखी विश्वनाथवामोरुसंस्थिता।
विशल्या विशिखा विघ्ना विप्ररूपा विहारिणी ॥ ५३
विनायकगुहक्रीडा विशालाक्षी विरागिणी।
विपुला विश्वरूपाख्या विषघ्नी विश्वभामिनी ॥ ५४
विशोका विरजा विप्रा विद्युल्लेखेव भासुरा।
विपरीतरतिप्रीतपतिर्विजयसंयुता ॥ ५५
विरिञ्चिविष्णुवनिताधृतचामरसेविता।
वीरपानप्रिया वीरा वीणापुस्तकधारिणी ॥ ५६
वीरमार्ताण्डवरदा वीरबाहुप्रियङ्करी।
वीराष्टाष्टकपरीता वीरशूरजनप्रिया ॥ ५७
वीजितश्रीचामरधृल्लक्ष्मीवाणीनिषेविता।
वीरलक्ष्मीर्वीतिहोत्रनिटिला वीरभद्रका ॥ ५८

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



वृक्षराजसुमूलस्था वृषभध्वजलाञ्छना ।
वृषाकपायी वृत्तज्ञा वृद्धा वृत्तान्तनायिका ॥ ५९

वृवॄवर्णाङ्गविन्यासा वेणीकृतशिरोरुहा ।
वेदिका वेदविनुता वेतण्डकृतवाहना ॥ ६०

वेदमाता वेगहन्त्री वेतसीगृहमध्यगा ।
वेतालनटनप्रीता वेङ्कटाद्रिनिवासिनी ॥ ६१

वेणुवीणामृदङ्गादि वाद्यघोषविशारदा ।
वेषिणी वैनतेयानुकम्पिनी वैरिनाशिनी ॥ ६२

वैनायकी वैद्यमाता वैष्णवी वैणिकस्वना ।
वैजयन्तीष्टवरदा वैकुण्ठवरसोदरी ॥ ६३

वैशाखपूजिता वैश्या वैदेही वैद्यशासिनी ।
वैकुण्ठा वैजयन्तीड्या वैयाघ्रमुनिसेविता ॥ ६४

वैहायसीनटीरासा वौषट्श्रौषट् स्वरूपिणी ।
वन्दिता वङ्गदेशस्था वंशगानविनोदिनी ॥ ६५

वम्रयादिरक्षिका वङ्क्रिर्वन्दारुजन वत्सला ।
वन्दिताखिललोकश्रीः वक्षःस्थलमनोहरा ॥ ६६

शर्वाणी शरभाकारा शस्रजन्मानुरागिणी ।
शकरी शमिताघौघा शक्ता शतकरार्चिता ॥ ६७

शची शरावती शक्रसेव्या शयितसुन्दरी ।
शरभृच्छबरी शक्तिमोहिनी शणपुष्पिका ॥ ६८

शकुन्ताक्षी शकाराख्या शतसाहस्रपूजिता ।
शब्दमाता शतावृत्तिपूजिता शत्रुनाशिनी ॥ ६९

शतानन्दा शतमुखी शमीबिल्वप्रिया शशी ।
शनकैः पदविन्यस्त प्रदक्षिणनतिप्रिया ॥ ७०

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



शातकुम्भाभिषिक्ताङ्गी शातकुम्भस्तनद्वयी ।
शातातपमुनीन्द्रेड्या शालवृक्षकृतालया ॥ ७१

शासका शाकरप्रीता शाला शाकंभरीनुता ।
शार्ङ्गपाणिबला शास्तृजननी शारदाम्बिका ॥ ७२

शापमुक्तमनुप्रीता शाबरीवेषधारिणी ।
शाम्भवी शाश्वतैश्वर्या शासनाधीनवल्लभा ॥ ७३

शास्त्रतत्त्वार्थनिलया शालिवाहनवन्दिता ।
शार्दूलचर्मवास्तव्या शान्तिपौष्टिकनायिका ॥ ७४

शान्तिदा शालिदा शापमोचिनी शाडवप्रिया ।
शारिका शुकहस्तोर्ध्वा शाखानेकान्तरश्रुता ॥ ७५

शाकलादिमऋक्शाखामन्त्रकीर्तितवैभवा ।
शिवकामेश्वराङ्कस्था शिखण्डिमहिषी शिवा ॥ ७६

शिवारम्भा शिवाद्वैता शिवसायुज्यदायिनी ।
शिवसङ्कल्पमन्त्रेड्या शिवेन सह मोदिता ॥ ७७

शिरीषपुष्पसङ्काशा शितिकण्ठकुटुम्बिनी ।
शिवमार्गविदां श्रेष्ठा शिवकामेशसुन्दरी ॥ ७८

शिवनाट्यपरीताङ्गी शिवज्ञानप्रदायिनी ।
शिवनृत्तसदालोकमानसा शिवसाक्षिणी ॥ ७९

शिवकामाख्यकोष्ठस्था शिशुदा शिशुरक्षकी ।
शिवागमैकरसिका शिक्षितासुरकन्यका ॥ ८०

शिल्पिशालाकृतावासा शिखिवाहा शिलामयी ।
शिंशपावृक्षफलवद्भिन्नानेकारिमस्तका ॥ ८१

शिरःस्थितेन्दुचक्राङ्का शितिकुम्भसुमप्रिया ।
शिञ्जन्नूपुरभूषात्तकृतमन्मथभेरिका ॥ ८२

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


शिवेष्टा शिबिकारूढा शिवारावाभयङ्करी।
शिरोर्ध्वनिलयासीना शिवशक्त्यैक्यरूपिणी॥ ८३

शिवासनसमाविष्टा शिवार्च्या शिववल्लभा।
शिवदर्शनसन्तुष्टा शिवमन्त्रजपप्रिया॥ ८४

शिवदूती शिवानन्या शिवासनसमन्विता।
शिष्याचरितशैलेशा शिवगानविगायिनी॥ ८५

शिवशैलकृतावासा शिवाम्बा शिवकोमला।
शिवगङ्गासरस्तीर प्रत्यङ्मन्दिरवासिनी॥ ८६

शिवाक्षरारम्भपञ्चदशाक्षरमनुप्रिया।
शिखादेवी शिवाभिन्ना शिवतत्वविमर्शिनी॥ ८७

शिवालोकनसन्तुष्टा शिवार्धाङ्गसुकोमला।
शिवरात्रिदिनाराध्या शिवस्य हृदयंगमा॥ ८८

शिवरूपा शिवपरा शिववाक्यार्थबोधिनी।
शिवार्चनरतां शिल्पलक्षणा शिल्पिसेविता॥ ८९

शिवागमरहस्योक्ता शिवोहंभावितान्तरा।
शिंबीजश्रवणानन्दा शिमन्तर्नामिमन्त्रराट्॥ ९०

शीकारा शीतला शीला शीतपङ्कजमध्यगा।
शीतभीरुः शीघ्रगन्त्री शीर्षका शीकरप्रभा॥ ९१

शीतचामीकराभासा शीर्षोद्धूपितकुन्तला।
शीतगङ्गाजलस्नाता शुका(क्रा)राधितचक्रगा॥ ९२

शुक्रपूज्या शुचिः शुभ्रा शुक्तिमुक्ता शुभप्रदा।
शुच्यन्तरङ्गा शुद्धाङ्गी शुद्धा शुकी शुचिव्रता॥ ९३

शुद्धान्ता शूलिनी शूर्पकर्णाम्बा शूरवन्दिता।
शून्यवादिमुखस्तम्भा शूरपद्मारिजन्मभूः॥ ९४

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


शृङ्गाररससम्पूर्णा शृङ्गिणी शृङ्गघोषिणी।
शृङ्गाभिषिक्तसुशिराः शृङ्गी शृङ्खलदोर्भटा ॥ ९५

शृङ्खलरूपा शेषतल्पभागिनी शेखरोडुपा।
शोणशैलकृतावासा शोकमोहनिवारिणी ॥ ९६

शोधनी शोभना शोचिष्केशतेजःप्रदायिनी।
शौरिपूज्या शौर्यवीर्या शौक्तिकेयसुमालिका ॥ ९७

श्रीश्च श्रीधनसम्पन्ना श्रीकण्ठस्वकुटुम्बिनी।
श्रीमाता श्रीफली श्रीला श्रीवृक्षा श्रीपतीडिता ॥ ९८

श्रीसंज्ञायुतताम्बूला श्रीमती श्रीधराश्रया।
श्रीबेरबद्धमालाढ्या श्रीफला श्रीशिवांगना ॥ ९९

श्रुतिः श्रुतिपदन्यस्ता श्रुतिसंस्तुतवैभवा।
श्रूयमाणचतुर्वेदा श्रेणिहंसनटाङ्घ्रिका ॥ १००

श्रेयसी श्रेष्ठिधनदा श्रोणानक्षत्र देवता।
श्रोणिपूज्या श्रोत्रकान्ता श्रोत्रे श्रीचक्रभूषिता ॥ १०१

श्रौषड्रूपा श्रौतस्मार्तविहिता श्रौतकामिनी।
शम्बराराातिसंपूज्या शङ्करी शम्भुमोहिनी ॥ १०२

षष्ठी षडाननप्रीता षट्कर्मनिरतस्तुता।
षट्शास्त्रपारसन्दर्शा षष्ठस्वरविभूषिता ॥ १०३

षट्कालपूजानिरता षण्ठत्वपरिहारिणी।
षड्रसप्रीतरसना षड्ग्रन्थिविनिभेदिनी ॥ १०४

षडभिज्ञमतध्वंसी षड्जसंवादिवाहिता।
षट्त्रिंशत्तत्वसंभूता षण्णवत्युपशोभिता ॥ १०५

षण्णवतितत्वनित्या षडङ्गश्रुतिपारदृक्।
षाण्डदेहार्धभागस्था षाड्गुण्यपरिपूरिता ॥ १०६

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


षोडशाक्षरमन्त्रार्था षोडशस्वरमातृका।
षोढाविभक्तषोढार्णा षोढान्यासपरायणा।। १०७

सकला सच्चिदानन्दा साध्वी सारस्वतप्रदा।
सायुज्यपदवीदात्री तथा सिंहासनेश्वरी।। १०८

सिनीवाली सिन्धुसीमा सीता सीमन्तिनीसुखा।
सुनन्दा सूक्ष्मदर्शाङ्गी सृणिपाशविधारिणी।। १०९

सृष्टिस्थिति संहारतिरोधानानुग्रहात्मिका।
सेव्या सेवकसंरक्षा सैंहिकेयग्रहार्चिता।। ११०

सोहंभावैकसुलभा सोमसूर्याग्निमण्डना।
सौःकाररूपा सौभाग्यवर्धिनी संविदाकृतिः।। १११

संस्कृता संहिता संघा सहस्रारनटाङ्गना।
हकारद्वयसन्दिग्धमध्यकूटमनुप्रभा।। ११२

हयग्रीवमुखाराध्या हरिर्हरपतिव्रता।
हादिविद्या हास्यभस्मीकृतत्रिपुरसुन्दरी।। ११३

हाटकश्रीसभानाथा हिङ्कारमन्त्रचिन्मयी।
हिरण्मयपु(प)राकोशा हिमा हीरककङ्कणा।। ११४

ह्रीङ्कारत्रयसम्पूर्णा ह्रींकारजपसौख्यदा।
हुताशनमुखाराध्या हुङ्कारहतकिल्बिषा।। ११५

हूं पृच्छा(ष्टा)नेकविज्ञप्तिः हृदयाकारताण्डवा।
हृद्ग्रन्थिभेदिका हृद्द्मन्त्रवर्णस्वरूपिणी।। ११६

हेमसभामध्यगता हेमा हैमवतीश्वरी।
हैयङ्गवीन हृदया होरा हौङ्काररूपिणी।। ११७

हंसकान्ता हंसमन्त्रतत्त्वार्थादिमबोधिनी।
हस्तपद्मालिङ्गिताम्रनाथाऽद्भुतशरीरिणी।। ११८

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


अनृतानृतसंवेद्या अपर्णा चार्भकाऽऽत्मजा।
आदिभूसदनाकार जानुद्वयविराजिता ॥ ११९

आत्मविद्या चेक्षुचापविधात्रीन्दुकलाधरा।
इन्द्राक्षीष्टार्थदा चेन्द्रा चेरंमदसमप्रभा ॥ १२०

ईकारचतुरोपेता चेशताण्डवसाक्षिणी।
उमोग्रभैरवाकारा ऊर्ध्वरेतोव्रताङ्गना ॥ १२१

ऋषिस्तुता ऋतुमती ऋजुमार्गप्रदर्शिनी।
ॠजुवादनसन्तुष्टा ऌॡवर्णमनुस्वना ॥ १२२

एधमानप्रभा चैला चैकान्ता चैकपाटला।
एत्यक्षरद्वितीयाङ्क कादिविद्यास्वरूपिणी ॥ १२३

ऐन्द्रा चैश्वर्यदा चौजा ओङ्कारार्थप्रदर्शिनी।
औषधायित साहस्रनाममन्त्रकदम्बका ॥ १२४

अम्बा चाम्भोजनिलया चांशभूतान्यदेवता।
अर्हणाऽऽहवनीयाग्निमध्यगाऽहमितीरिता ॥ १२५

कल्याणी कत्रयाकारा काञ्चीपुरनिवासिनी।
कात्यायनी कामकला कालमेघाभमूर्धजा ॥ १२६

कान्ता काम्या कामजाता कामाक्षी किङ्किणीयुता।
कीनाशनायिका कुब्जकन्यका कुङ्कुमाकृतिः ॥ १२७

कुल्लुकासेतुसंयुक्ता कुरङ्गनयना कुला।
कूलकंषकृपासिन्धुः कूर्मपीठोपरिस्थिता ॥ १२८

कृशाङ्गी कृत्तिवसना क्लींकारी क्लींमनूदिता।
केसरा केलिकासारा केतकीपुष्पभासुरा ॥ १२९

कैलासवासा कैवल्यपदसंचारयोगिनी।
कोशाम्बा कोपरहिता कोमला कौस्तुभान्विता ॥ १३०

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


कौशिकी कंसदष्टाङ्गी कञ्चुकी कर्मसाक्षिणी।
क्षमा क्षान्तिः क्षितीशार्च्या क्षीराब्धिकृतवासिनी॥ १३१

क्षुरिकास्त्रा क्षेत्रसंस्था क्षौमाम्बरसुशुभ्रगा।
खवासा खण्डिका खाङ्ककोटिकोटिसमप्रभा॥ १३२

खिलर्क्सूक्तजपासक्ता खेटग्रहार्चितान्तरा।
खण्डिता खण्डपरशुसमाश्लिष्टकलेवरा॥ १३३

गव्य(वय) शृङ्गाभिषिक्ताङ्गी गवाक्षी गव्यमज्जना।
गणाधिपप्रसूर्गम्या गायत्री गानमालिका॥ १३४

गार्हपत्याग्निसंपूज्या गिरीशा गिरिजा च गीः।
गीर्वाणीवीजनानन्दा गीतिशास्त्रानुबोधिनी॥ १३५

गुग्गुलो(लू)पेतधूपाढ्या गुडान्नप्रीतमानसा।
गूढकोशान्तराराध्या गूढशब्दविनोदिनी॥ १३६

गृहस्थाश्रमसंभाव्या गृहश्रेणीकृतोत्सवा।
गृ ग्लृ शब्दसुविज्ञात्री गेयगानविगायिनी॥ १३७

गैरिकाभरणप्रीता गोमाता गोपवन्दिता।
गौरी गौरवत्रैपुण्ड्रा गङ्गा गन्धर्ववन्दिता॥ १३८

गहना गह्वराकारदहरान्तःस्थिता घटा।
घटिका घनसारादिनीराजनसमप्रभा॥ १३९

घारिपूज्या घुसृणाभा घूर्णिताशेषसैनिका।
घृघॄघ्लृ स्वरसंपन्ना घोरसंसारनाशिनी॥ १४०

घोषा घौषाक्तखड्गास्त्रा घण्टामण्डलमण्डिता।
ङकारा चतुरा चक्री चामुण्डा चारुवीक्षणा॥ १४१

चिन्तामणिमनुध्येया चित्रा चित्रार्चिता चितिः।
चिदानन्दा चित्रिणी चिच्चिन्त्या चिदम्बरेश्वरी॥ १४२

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


चीनपट्टांशुकालेपकटिदेशसमन्विता ।
चुलुकीकृतवाराशिमुनिसेवितपादुका ॥ १४३
चुम्बितस्कन्दविघ्नेशपरमेशप्रियंवदा ।
चूलिका चूर्णिका चूर्णकुन्तला चेटिकावृता । १४४
चैत्री चैत्ररथारूढा चोलभूपालवन्दिता ।
चोरितानेकहृत्पद्मा चौक्षा चन्द्रकलाधरा ॥ १४५
चर्मकृष्णमृगाधिष्ठा छत्रचामरसेविता ।
छान्दोग्योपनिषद्गीता छादिताण्डस्वशाम्बरी ॥ १४६
छान्दसानां स्वयंव्यक्ता छायामार्तण्डसेविता ।
छायापुत्रसमाराध्या छिन्नमस्तावरप्रदा ॥ १४७
जयदा जगतीकन्दा जटाधरधृता जया ।
जाह्नवी जातवेदाख्या जापकेष्टहितप्रदा ॥ १४८
जालन्धरासनासीना जिगीषा जितसर्वभूः ।
जिष्णुर्जिह्वाग्रनिलया जीवनी जीवकेष्टदा ॥ १४९
जुगुप्साढ्या जूतिर्जू(जू)र्णा जृम्भकासुरसूदिनी ।
जैत्री जैवातृकोत्तंसा जोटिं(षं)गा जोषदायिनी ॥ १५०
झञ्झानिलमहावेगा झषा झर्झरघोषिणी ।
झिण्टीसुमपरप्रेम्णा(प्रीता) झिल्लिकाकेलिलालिता ॥ १५१
टङ्कहस्ता टङ्कितज्या टिट्टरीवाद्यसुप्रिया ।
टिट्टिभासनहृत्संस्था ठवर्गचतुरानना ॥ १५२
डमड्डमरुवाद्यूर्ध्वा णकाराक्षररूपिणी ।
तत्त्वज्ञा तरुणी सेव्या तप्तजाम्बूनदप्रभा ॥ १५३
तत्त्वपुस्तोल्लसत्पाणिः तपनोडुपलोचना ।
तार्तीयभूपुरात्मस्वपादुका तापसेडिता ॥ १५४

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


तिलकायितसर्वेशनिटिलेक्षणशोभना।
तिथिस्तिल्लवनान्तःस्था तीक्ष्णा तीर्थान्तलिङ्गयुक्॥ १५५
तुलसी तुरगारूढा तूलिनी तूर्यवादिनी।
तृप्ता तृणीकृताराातिसेनासङ्गमहाभटा॥ १५६
तेजिनीवनमायूरी तैलाद्यैरभिषेचिता।
तोरणाङ्कितनक्षत्रा तोटकीवृत्तसन्नुता॥ १५७
तौणीरपुष्पविशिखा तौर्यत्रिकसमन्विता।
तन्त्रिणी तर्कशास्त्रज्ञा तर्कवार्ताविदूरगा॥ १५८
तर्जन्यंगुष्ठसंलग्न मुद्राञ्चितकराब्जिका।
थकारिणी थां थीं थों थैं कृतलास्यसमर्थका॥ १५९
दशाश्वरथसंरूढा दक्षिणामूर्तिसंयुगा।
दशबाहुप्रिया दह्रा दशाशाशासनेडिता॥ १६०
दारका दारुकारण्यवासिनी दिग्विलासिनी।
दीक्षिता दीक्षिताराध्या दीनसन्तापनाशिनी॥ १६१
दीपाग्रमङ्गला दीप्ता दीव्यद्ब्रह्माण्डमेखला।
दुरत्यया दुराराध्या दुर्गा दुःखनिवारिणी॥ १६२
दूर्वासतापसाराध्या दूती दूर्वाप्रियप्रसूः।
दृष्टान्तरहिता देवमाता दैत्यविभञ्जिनी॥ १६३
दैविकागारयन्त्रस्था दोर्द्वन्द्वातीतमानसा।
दौर्भाग्यनाशिनी दौती दौवारिकनिधिद्वयी॥ १६४
दण्डिनीमन्त्रिणीमुख्या दहराकाशमध्यगा।
दर्भारण्यकृतावासा दह्रविद्याविलासिनी॥ १६५
धन्वन्तरीड्या धनदा धारासाहस्रसेचना।
धेनुमुद्रा धेनुपूज्या धैर्या धौम्यनुतिप्रिया॥ १६६

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


नमिता नगरावासा नटी नलिनपादुका।
नकुली नाभिनालाग्रा नाभावष्टदलाब्जिनी ॥ १६७

नारिकेलामृतप्रीता नारीसंमोहनाकृतिः।
निगमाश्वरथारूढा नीललोहितनायिका ॥ १६८

नीलोत्पलप्रिया नीला नीलाम्बा नीपवाटिका।
नुतकल्याणवरदा नूतना नृपपूजिता ॥ १६९

नृहरिस्तुतहृत्पूर्णा नृत्तेशी नृत्तसाक्षिणी।
नैगमज्ञानसंसेव्या नैगमज्ञानदुर्लभा ॥ १७०

नौकारूढेश वामोरुवीक्षितस्थिरसुन्दरी।
नन्दिविद्या नन्दिकेशविनुता नन्दनानना ॥ १७१

नन्दिनी नन्दजा नम्या नन्दिताशेषभूपुरा।
नर्मदा परमाद्वैतभाविता परिपन्थिनी ॥ १७२

परा परीतदिव्यौघा परशंभुपुरन्ध्रिका।
पथ्या परब्रह्मपत्नी पतञ्जलिसुपूजिता ॥ १७३

पद्माक्षी पद्मिनी पद्मा परमा पद्मगन्धिनी।
पयस्विनी परेशाना पद्मनाभसहोदरी ॥ १७४

परार्धा परमैश्वर्यकारणा परमेश्वरी।
पातञ्जलाख्य कल्पोक्तशिवावरणसंयुता ॥ १७५

पाशकोदण्डसुमभृत् पारिपार्श्वकसंनुता।
पिञ्छा(ञ्जा) विलेपसुमुखा पितृतुल्या पिनाकिनी ॥ १७६

पीतचन्दनसौगन्धा पीताम्बर सहोद्भवा।
पुण्डरीकपुरीमध्यवर्तिनी पुष्टिवर्धिनी ॥ १७७

पूरयन्ती पूर्यमाणा पूर्णाभा पूर्णिमान्तरा।
पृच्छामात्रातिशुभदा पृथ्वीमण्डलशासिनी ॥ १७८

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



पूतना पेशला पेरुमण्डला पैत्ररक्षकी।
पौषी पौण्ड्रेक्षुकोदण्डा पञ्चपञ्चाक्षरी मनुः ॥ १७९

पञ्चमीतिथिसंभाव्या पञ्चकोशान्तरस्थिता।
फणाधिपसमाराध्या फणामणिविभूषिता ॥ १८०

बकपुष्पकृतोत्तंसा बगला बलिनी बला।
बालार्कमण्डलाभासा बाला बालविनोदिनी ॥ १८१

बिन्दुचक्रशिवाङ्कस्था बिल्वभूषितमूर्धजा।
बीजापूरफलासक्ता बीभत्सावहदृक्त्रयी ॥ १८२

बुभुक्षावर्जिता बुद्धिसाक्षिणी बुधवर्षका।
बृहती बृहदारण्यनुता बृहस्पतीडिता ॥ १८३

बेराख्या बैन्दवाकार वैरिञ्चसुषिरान्तरा।
बोद्ध्री बोधायना बौद्धदर्शना बन्धमोचनी ॥ १८४

भट्टारिका भद्रकाली भारतीभा भिषग्वरा।
भित्तिका भिन्नदैत्याङ्गा भिक्षाटनसहानुगा ॥ १८५

भीषणा भीतिरहिता भुवनत्रयशंकरा।
भूतघ्नी भूतदमनी भूतेशालिङ्गनोत्सुका ॥ १८६

भूतिभूषितसर्वाङ्गी भृग्वङ्गिरमुनिप्रिया।
भृङ्गिनाट्यविनोदज्ञा भैरवप्रीतिदायिनी ॥ १८७

भोगिनी भोगशमनी भोगमोक्षप्रदायिनी।
भौमपूज्या भण्डहन्त्री भग्नदक्षक्रतुप्रिया ॥ १८८

मकारपञ्चमी मह्या मदनी मकरध्वजा।
मत्स्याक्षी मधुरावासा मन्वश्रहृदयाश्रया ॥ १८९

मार्ताण्ड विनुता माणिभद्रेड्या माधवार्चिता।
माया मारप्रिया मारसखीड्या माधुरीमनाः ॥ १९०

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


माहेश्वरी माहिषघ्नी मिथ्यावादप्रणाशिनी ।
मीनाक्षी मीनसंसृष्टा मीमांसाशास्त्रलोचना ॥ १९१

मुग्धाङ्गी मुनिबृन्दार्च्या मुक्तिदा मूलविग्रहा ।
मूषिकारूढजननी मूढभक्तिमदर्चिता ॥ १९२

मृत्युञ्जयसती मृग्या मृगालेपनलोलुपा ।
मेधाप्रदा मेखलाढ्या मेघवाहनसेविता ॥ १९३

मेनात्मजा मैथिलीशकृतार्चन पदाम्बुजा ।
मैत्री मैनाकभगिनी मोहजालप्रणाशिनी ॥ १९४

मोदप्रदा मौलिगेन्दुकलाधरकिरीटभाक् ।
मौहूर्तलग्नवरदा मञ्जीरा मञ्जुभाषिणी ॥ १९५

मर्मज्ञात्री महादेवी यमुना यज्ञसंभवा ।
यातनारहिता याना यामिनीपूजकेष्टदा ॥ १९६

युक्ता यूपा यूथिकार्च्या योगा योगेशयोगदा ।
(यक्षराजसखान्तरा)
रथिनी रजनी रत्नगर्भा रक्षितभूरुहा ॥ १९७

रमा रसक्रिया रश्मिमालासन्नुतवैभवा ।
रक्ता रसा रती रथ्या रणन्मञ्जीरनूपुरा ॥ १९८

रक्षा रविध्वजाराध्या रमणी रविलोचना ।
रसज्ञा रसिका रक्तदन्ता रक्षणलम्पटा ॥ १९९

रक्षोघ्नजपसन्तुष्टा रक्ताङ्गापाङ्गलोचना ।
रत्नद्वीपवनान्तःस्था रजनीशकलाधरा ॥ २००

रत्नप्रकारनिलया रणमध्या रमार्थदा ।
रजनीमुखसंपूज्या रत्नसानुस्थिता रयिः ॥ २०१

—*—

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



९

# योगनायिकासहस्रनामावलिः

(राजराजेश्वरीसहस्रनामावलिरित्यपि)

ओं राजराजेश्वर्यै नमः । राजरक्षक्यै । राजनर्तक्यै । राजविद्यायै । राज पूज्यायै । राजकोश समृद्धिदायै । राजहंसतिरस्कारिगमनायै । राजलोचनायै । राज्ञां गुरुवराराध्यायै । राजयुक्तनटाङ्गनायै । राजगर्भायै । राजकन्दकदलीसक्तमानसायै । राज्ञां कविकुलाख्यातायै । राजयोगनिवारिण्यै ।राजौषधि सुसम्पन्नायै । राजनीति विशारदायै । राज्ञां सभालङ्कृताङ्ग्यै । राजलक्षण संयुतायै । राजद्दलायै । राजवल्लयै नमः । २०

ओं राजत्तिल्ववनाधिपायै नमः । राजसद्गुणनिर्दिष्टायै । राजमार्गरथोत्सवायै । राजचक्राङ्कितकरायै । राजांशायै । राजशासनायै । राजत्कृपायै । राजलक्ष्म्यै । राजत्कञ्चुक धारिण्यै । राजाहङ्कार शमनायै । राजकार्यधुरन्धरायै । राजाज्ञायै । राजमातङ्ग्यै । राजयन्त्रकृतार्चनायै । राजक्रीडायै । राजवेश्मप्रवेशितनिजाश्रितायै । राजमन्दिरवात्सल्यायै । राजस्त्रियै । राजजागरायै । राजशापविनिर्मुक्तायै नमः । ४०

ओं राजश्रियै नमः । राजमन्त्रिण्यै । राजपुत्र्यै । राजमैत्र्यै । राजान्तः पुरवासिन्यै । राजपापविनिर्मुक्तायै । राजर्षिपरि-सेवितायै । रांजोत्तम मृगारूढायै । राज्ञस्तेजः प्रदायिन्यै । राजार्चित पदाम्भोजायै । राजालङ्कार वेष्टितायै । राजसूय समाराध्यायै । राजसाहस्रसेवितायै । राजसन्तापशमन्यै । राजशब्दपरायणायै । राजार्हमणिभूषाढ्यायै । राजच्छृंगार नायिकायै ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


राजद्रुमूलसंराजद्विघ्नेशवरदायिन्यै । राजपर्वतकौमार्यै । राजशौर्य प्रदायिन्यै नमः । ६०

ओं राजाभ्यन्तः समाराध्यायै नमः । राजमौलि मनस्विन्यै । राजमात्रे । राजमाष प्रियार्चितपदाम्बुजायै । राजारिमर्दिन्यै । राज्ञ्यै । राजत्कल्हार हस्तकायै । रामचन्द्रसमाराध्यायै । रामायै । राजीवलोचनायै । रावणेश समाराध्यायै । राकाचन्द्र समाननायै । रात्रिसूक्तजप प्रीतायै । रागद्वेष विवर्जितायै । रिङ्खन्नूपुरपादाब्जायै । रिट्यादिपरिसेवितायै । रिपुसंघकुलध्वान्तायै । रिगमस्वर भूषितायै । रुक्मिणीश सहोद्भूतायै । रुद्राण्यै नमः । ८०

ओं रुरुभैरव्यै नमः । रुग्घन्त्र्यै । रुद्रकोपाग्निशमन्यै । रुद्रसंस्तुतायै । रुषानिवारिण्यै । रूपलावण्याम्बुधि चन्द्रिकायै । रूप्यासनप्रियायै । रूढायै । रूप्यचन्द्रशिखामणये । रेफवर्ण-गळायै । रेवानदीतीर विहारिण्यै । रेणुकायै । रेणुकाराध्यायै । रेखोर्ध्वकृतचक्रिण्यै । रैणुकेयाख्यकल्पोक्त यजनप्रीतमानसायै । रोमलम्बितविध्यण्डायै । रोमन्थमुनिसेवितायै । रोमावलि सुलावण्य मध्यभागसुशोभितायै । रोचनागरुकस्तूरी चन्दनश्रीविलेपितायै । रोहिणीश कृतोत्तंसायै नमः । १००

ओं रोहिणीपितृवन्दितायै नम । रोहिताश्व सुसंभूतायै । रौहिणेयानुजार्चितायै । रौप्यसिंहासनारूढचाक्षुष्मन्मन्त्र विग्रहायै । रौद्र मन्त्राभिषिक्ताङ्ग्यै । रौद्रमध्य समीडितायै । रौरवान्तकर्यै । रौच्यपत्रपुष्पकृतार्चनायै । रङ्गलास्य कृतालोलायै । रङ्गवल्याद्यलङ्कृतायै । रञ्जक श्री सभामध्यगायकान्तरवासिन्यै । ललितायै । लड्डुकप्रीतमानसस्कन्दजन्मभुवे । लकारत्रयुक्त श्री विद्यामन्त्रकदम्बकायै । लक्षणायै । लक्षणाराध्यायै । लक्षबिल्वार्चन

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


प्रियायै। लज्जाशीलायै। लक्षणज्ञायै। लकुचान्नकृतादरायै नमः। १२०

ओं ललाटनयनार्धाङ्ग्यै नमः। लवङ्गत्वक्सुगन्धवाचे। लाजहोमप्रियायै। लाक्षागृहे कौन्तेय सेवितायै। लाङ्गल्यै। लालनायै। लालायै। लालिकायै। लिङ्गपीठगायै। लिपिव्यष्टि-समष्टिज्ञायै। लिपिन्यस्तत्रिणेत्रभृते। लुङ्गाफलसमासक्तायै। लुलायासुरघातुक्यै। लूतिकापतिसंपूज्यायै। लूताविस्फोट-नाशिन्यै। लृलॄवर्णस्वरूपाढ्यायै। लेखिन्यै। लेखकप्रियायै। लेह्यचोष्यपेय-खाद्यभक्ष्यभोज्यादिमप्रियायै। लेपितश्रीचन्दनाङ्ग्यै नमः। १४०

ओं लैङ्गमार्गप्रपूजितायै नमः। लोलम्बिरत्न हाराङ्ग्यै। लोलाक्ष्यै। लोकवन्दितायै। लोपामुद्रार्चितपदायै। लोपामुद्रापतीडितायै। लोभकामक्रोधमोहमदमात्सर्य वारितायै। लोहजप्रतिमायन्त्रवासिन्यै। लोकरञ्जिन्यै। लोकवेद्यायै। लोलडोलास्थित शम्भुविहारिण्यै। लोलजिह्वापरीताङ्ग्यै। लोकसंहारकारिण्यै। लौकिकीज्या विदूरस्थायै। लङ्केशानसुपूजितायै। लम्पटायै। लम्बिमालाभिनन्दितायै। लवलीधरायै। वक्रतुण्डप्रियायै। वज्रायै नमः। १६०

ओं वधूट्यै नमः। वनवासिन्यै। वध्वै। वचनसन्तुष्टायै। वत्सलायै। वटुभैरव्यै। वटमूलनिवासार्ध्यै। वरवीराङ्गनावृतायै। वनितायै। वर्धन्यै। वर्ष्यायै। वरालीरागलोलुपायै। वलयीकृत माहेशकरसौवर्णकन्धरायै। वराङ्ग्यै। वसुधायै। वप्रकेलिन्यै। वणिजायै। वरायै। वपुरायित श्री चक्रायै। वरदायै नमः। १८०

ओं वरवर्णिन्यै नमः। वराह वदनाराध्यायै। वर्णपञ्चदशात्मिकायै। वसिष्ठाच्यायै। वल्कलान्तर्हितरम्यस्त-

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


नद्ध्यै ।वशिन्यै। वल्लक्यै। वर्णायै। वर्षाकाल प्रपूजितायै। वल्लचै । वसुदलप्रान्तवृत्तकट्याश्रितादरायै । वर्गायै । वरवृषारूढायै । वषण्मन्त्रसुसंज्ञकायै । वलयाकार वैडूर्यवरकङ्कणभूषणायै । वज्राश्चितशिरोभूषायै । वज्रमांगल्यभूषितायै । वाग्वादिन्यै । वामकेश्यै। वाचस्पतिवरप्रदायै नमः ।। २००

ओं वादिन्यै नमः। वागधिष्ठात्र्यै। वारुण्यै। वायुसेवितायै। वात्स्यायनसुतन्त्रोक्तायै । वाण्यै । वाक्यपदार्थजायै । वाद्यघोषप्रियायै । वाद्यवृन्दारम्भनटोक्सुकायै। वापीकूपसमी-पस्थायै । वार्ताल्यै । वामलोचनायै । वास्तोष्पतीड्यायै । वामाङ्घ्रिधृतनूपुरशोभितायै। वामायै। वाराणसी क्षेत्रायै। वाडबेय वरप्रदायै। वामाङ्गायै। वाञ्छित फलदात्र्यै। वाचाल खण्डितायै नमः। २२०

ओं वाच्यवाचक वाक्यार्थायै नमः । वामनायै । वाजिवाहनायै । वासुकीकण्ठभूषाढ्य वामदेवप्रियाङ्गनायै । विजयायै । विमलायै । विश्वायै । विग्रहायै । विधृताङ्कुशायै । विनोदवनवास्तव्यायै। विभक्ताण्डायै। विधीडितायै। विक्रमायै। विषजन्तुघ्न्यै। विश्वामित्रवरप्रदायै। विश्वम्भरायै। विष्णुशक्त्यै। विजिज्ञासायै। विचक्षणायै। विटङ्कत्यागराजेन्द्रपीठ संस्थायै नमः । २४०

ओं विधीडितायै नमः। विदितायै। विश्वजनन्यै। विस्तारित चमूबलायै । विद्यायै । विनयसंपन्नायै । विद्याद्वादशनायिकायै । विभाकरात्यर्बुदाभायै । विधात्र्यै । विन्ध्यवासिन्यै । विरूपाक्ष-सख्यै । विश्वनाथवामोरु संस्थितायै। विशल्यायै। विशिखायै। विघ्नायै । विप्ररूपायै । विहारिण्यै । विनायकगुहक्रीडायै । विशालाक्ष्यै। विरागिण्यै नमः। २६०

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



ओं विपुलायै नमः । विश्वरूपाख्यायै । विषद्घ्यै । विश्वभामिन्यै । विशोकायै । विरजायै । विप्रायै । विद्युल्लेखेव-भासुरायै। विपरीतरतिप्रीतपत्ये। विजयसंयुतायै। विरिञ्चिविष्णु-वनिताधृत चामरसेवितायै। वीरपानप्रियायै। वीरायै। वीणापुस्तक-धारिण्यै । वीरमार्ताण्डवरदायै । वीरबाहुप्रियङ्कर्यै । वीराष्टाष्टक परीतायै। वीरशूरजनप्रियायै। वीजितश्रीचामरधृत् लक्ष्मीवाणीनि-षेवितायै। वीरलक्ष्म्यै नमः । २८०

ओं वीतिहोत्रनिटिलायै नमः । वीरभद्रकायै । वृक्षराजसुमूलस्थायै । वृषभध्वजलाञ्छनायै। वृषाकपाय्यै । वृत्तज्ञायै । वृद्धायै । वृत्तान्तनायिकायै । वृवॄवर्णाङ्गविन्यासायै । वेणीकृतशिरोरुहायै । वेदिकायै । वेदविनुतायै । वेतण्डकृतवाह-नायै । वेदमात्रे । वेगहन्त्र्यै । वेतसीगृहमध्यगायै । वेतालनटन-प्रीतायै । वेङ्कटाद्रिनिवासिन्यै । वेणुवीणामृदङ्गादिवाद्यघोष-विशारदायै। वेषिण्यै नमः । ३००

ओं वैनतेयानुकम्पिन्यै नमः । वैरिनाशिन्यै । वैनायक्यै । वैद्यमात्रे । वैष्णव्यै । वैणिकस्वनायै । वैजयन्तीष्ट-वरदायै ।वैकुण्ठवरसोदर्यै। वैशाखपूजितायै। वैश्यायै। वैदेह्यै। वैद्यशासिन्यै ।वैकुण्ठायै। वैजयन्तीड्यायै। वैयाघ्रमुनिसेवितायै। वैहायसी नटीरासायै । वौषट्श्रौषट्स्वरूपिण्यै । वन्दितायै । वङ्गदेशस्थायै। वंशगानविनोदिन्यै नमः । ३२०

ओं वम्यादिरक्षक्यै नमः । वंक्र्यै। वन्दारुजन वत्सलायै। वन्दिताखिललोकश्रियै । वक्षःस्थल मनोहरायै । शर्वाण्यै । शरभाकारायै । शप्तजन्मानुरागिण्यै । शर्वर्यै । शमिताघौघायै । शक्तायै । शतकरार्चितायै । शच्यै । शरावत्यै । शक्रसेव्यायै । शयितसुन्दर्यै । शरभृच्छबर्यै । शक्तिमोहिन्यै । शणपुष्पिकायै । शकुन्ताक्ष्यै नमः । ३४०

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


ओं शकाराख्यायै नमः । शतसाहस्रपूजितायै । शब्दमात्रे । शतावृत्तिपूजितायै । शत्रुनाशिन्यै । शतानन्दायै । शतमुख्यै । शमीबिल्वप्रियायै । शश्यै । शनकैः पदविन्यस्तप्रदक्षिणनति-प्रियायै । शातकुम्भाभिषिक्ताङ्ग्यै । शातकुम्भस्तनद्वय्यै । शातातपमुनीन्द्रेड्यायै । शालवृक्षकृतालयायै । शासकायै । शाकरप्रीतायै । शालायै । शाकम्भरीनुतायै । शार्ङ्गपाणिबलायै । शास्तृजनन्यै नमः । ३६०

ओं शारदाम्बिकायै नमः । शापमुक्तमनुप्रीतायै । शाबरीवेषधारिण्यै । शाम्भव्यै । शाश्वतैश्वर्यायै । शासनाधीन-वल्लभायै । शास्त्रतत्वार्थनिलयायै । शालिवाहनवन्दितायै । शार्दूलचर्मवास्तव्यायै । शान्तिपौष्टिकनायिकायै । शान्तिदायै । शालिदायै । शापमोचिन्यै । शाडगप्रियायै । शारिकाशुकहस्तोर्ध्वायै । शाखानेकान्तर श्रुतायै । शाकलादिम ऋक्शाखामन्त्र कीर्तित वैभवायै । शिवकामेश्वराङ्कस्थायै । शिखण्डिमहिष्यै । शिवायै नमः । ३८०

ओं शिवारम्भायै नमः । शिवाद्वैतायै । शिवसायुज्य दायिन्यै । शिवसङ्कल्पमन्त्रेड्यायै । शिवेनसहमोदितायै । शिरीषपुष्पसङ्काशायै । शितिकण्ठकुटुम्बिन्यै । शिवमार्गविदां-श्रेष्ठायै । शिवकामेशसुन्दर्यै । शिवनाट्यपरीताङ्ग्यै । शिवज्ञान-प्रदायिन्यै । शिवनृत्तसदालोकमानसायै । शिवसाक्षिण्यै । शिवकामाख्यकोष्ठस्थायै । शिशुदायै । शिशुरक्षक्यै । शिवागमै-करसिकायै । शिक्षितासुरकन्यकायै । शिल्पिशालाकृतावासायै । शिखिवाहायै नमः । ४००

ओं शिलामय्यै नमः । शिंशपावृक्षफलवच्छिन्नानेकारि मस्तकायै । शिरःस्थितेन्दु चक्राङ्कायै । शितिकुम्भसुमप्रियायै ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


शिंजन्नूपुरभूषात्तकृतमन्मथभेरिकायै। शिवेष्टायै। शिबिकारूढायै । शिवारावाभयङ्कर्यै । शिरोर्ध्वनिलयासीनायै । शिवशक्त्यैक्य रूपिण्यै । शिवासनसमाविष्टायै। शिवाच्यर्यै। शिववल्लभायै। शिवदर्शनसन्तुष्टायै । शिवमन्त्रजपप्रियायै । शिवदूत्यै । शिवानन्यायै । शिवासनसमन्वितायै । शिष्याचरितशैलेशायै । शिवगान विगायिन्यै नमः । ४२०

ओं शिवशैलकृतावासायै नमः । शिवाम्बायै । शिवकोमलायै । शिवगङ्गासरस्तीरप्रत्यङ्मन्दिरवासिन्यै। शिवा-क्षरारम्भपञ्चदशाक्षरमनुप्रियायै । शिखादेव्यै । शिवाभिन्नायै । शिवतत्वविमर्शिन्यै । शिवालोकनसन्तुष्टायै । शिवार्धाङ्ग सुकोमलायै । शिवरात्रिदिनाराध्यायै । शिवस्यहृदयङ्गमायै । शिवरूपायै। शिवपरायै। शिववाक्यार्थबोधिन्यै। शिवार्चनरतायै । शिल्पलक्षणायै । शिल्पिसेवितायै । शिवागमरहस्योक्तायै । शिवोहंभावितान्तरायै नमः । ४४०

ओं शिम्बीजश्रवणानन्दायै नमः । शिमन्तर्नाममन्त्रराजे । शीकारायै । शीतलायै । शीलायै । शीतपङ्कजमध्यगायै । शीतभीरवे । शीघ्रगन्त्र्यै। शीर्षकायै। शीकरप्रभायै। शीतचामी-कराभासायै । शीर्षोद्धूपित कुन्तलायै । शीतगङ्गाजलस्नातायै । शुका(क्रा)राधित चक्रगायै । शुक्रपूज्यायै । शुच्यै । शुभ्रायै । शुक्तिमुक्तायै । शुभप्रदायै। शुच्यन्तरङ्गायै नमः । ४६०

ओं शुद्धाङ्ग्यै नमः । शुद्धायै । शुक्यै । शुचिव्रतायै । शुद्धान्तायै । शूलिन्यै । शूर्पकर्णाम्बायै । शूरवन्दितायै । शून्यवादिमुखस्तम्भायै । शूरपद्मारिजन्मभुवे । शृङ्गाररस-सम्पूर्णायै । शृङ्गिण्यै । शृङ्गघोषिण्यै । शृङ्गाभिषिक्तसुशिरसे ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


शृङ्ग्यै । शृङ्खलदोर्भटायै । शूश्लृरूपायै । शेषतल्पभगिन्यै । शेखरोडुपायै । शोणशैलकृतावासायै नमः । ४८०

ओं शोकमोहनिवारिण्यै नमः । शोधन्यै । शोभनायै । शोचिष्केशतेजः प्रदायिन्यै । शौरिपूज्यायै । शौर्यवीर्यायै । शौक्तिकेयसुमालिकायै । श्रियै । श्रीधनसम्पन्नायै । श्रीकण्ठस्व-कुटुम्बिन्यै । श्रीमात्रे । श्रीफल्यै । श्रीलायै । श्रीवृक्षायै । श्रीपती-डितायै । श्रीसंज्ञायुतताम्बूलायै । श्रीमत्यै । श्रीधराश्रयायै । श्रीबेरबद्धमालाढ्यायै । श्रीफलायै नमः । ५००

श्रीशिवाङ्गनायै नमः । श्रुत्यै । श्रुतिपदन्यस्तायै । श्रुतिसंस्तुतवैभवायै । श्रूयमाण चतुर्वेदायै । श्रेणिहंसनटाङ्घ्रिकायै । श्रेयस्यै । श्रेष्ठिधनदायै । श्रोणानक्षत्र देवतायै । श्रोणिपूज्यायै । श्रोत्रकान्तायै । श्रोत्रे श्री चक्रभूषितायै । श्रौषड्रूपायै । श्रौतस्मार्तविहितायै । श्रौतकामिन्यै । शम्बराराति सम्पूज्यायै । शङ्कर्यै । शम्भुमोहिन्यै । षष्ठ्यै । षडाननप्रीतायै नमः । ५२०

ओं षट्कर्मनिरतस्तुतायै नमः । षट्छास्त्रपारसन्दर्शायै । षष्ठस्वरविभूषितायै । षट्कालपूजानिरतायै । षण्ठत्वपरिहारिण्यै । षड्रसप्रीतरसनायै । षड्ग्रन्थिविनिभेदिन्यै । षडभिज्ञमतध्वंस्यै । षड्जसंवादिवाहितायै । षट्त्रिंशत्तत्व संभूतायै । षण्णवत्युप-शोभितायै । षण्णवतितत्व नित्यायै । षडङ्गश्रुतिपारदृशे । षाण्डदेहार्धभागस्थायै । षाड्गुण्यपरिपूरितायै । षोडशाक्षर-मन्त्रार्थायै । षोडशस्वर मातृकायै । षोढाविभक्त षोढार्णायै । षोढान्यासपरायणायै । सकलायै नमः । ५४०

ओं सच्चिदानन्दायै नमः । साध्व्यै । सारस्वतप्रदायै । सायुज्यपदवीदात्र्यै । सिंहासनेश्वर्यै । सिनीवाल्यै । सिन्धुसीमायै ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



सीतायै। सीमन्तिनीसुखायै। सुनन्दायै। सूक्ष्मदर्शाङ्ग्यै। सृणिपाश विधारिण्यै। सृष्टिस्थिति संहार तिरोधानानुग्रहात्मिकायै। सेव्यायै। सेवकसंरक्षायै। सैंहिकेय ग्रहार्चितायै। सोहंभावैक सुलभायै। सोमसूर्याग्नि मण्डनायै। सौः काररूपायै। सौभाग्यवर्द्धिन्यै नमः। ५६०

ओं संविदाकृतये नमः। संस्कृतायै। संहितायै। संघायै। सहस्रारनटाङ्गनायै। हकारद्वयसन्दिग्धमध्यकूटमनुप्रभायै। हयग्रीवमुखाराध्यायै। हर्यै। हरपतिव्रतायै। हादिविद्यायै। हास्यभस्मीकृतत्रिपुरसुन्दर्यै। हाटक श्री सभानाथायै। ह्रिङ्कारमन्त्र चिन्मय्यै। हिरण्मयपराकोशायै। हिमायै। हीरक कङ्कणायै। ह्रीङ्कारत्रय संपूर्णायै। ह्रींकारजप सौख्यदायै। हुताशनमुखाराध्यायै। हुङ्कारहत किल्बिषायै। ५८०

हूंपृच्छानेक जिज्ञासये। हृदयाकारताण्डवायै। हृद्ग्रन्थिभेदिकायै। हृल्लमन्त्रवर्णस्वरूपिण्यै। हेमसभामध्यगतायै। हेमायै। हैमवतीश्वर्यै। हैयङ्गवीनहृदयायै। होरायै। हौङ्काररूपिण्यै। हंसकान्तायै। हंसमन्त्रतत्वार्थादिमबोधिन्यै। हस्तपद्मालिङ्गताम्रनाथायै। अद्भुतशरीरिण्यै। अनृतानृतसंवेद्यायै। अपर्णायै। अर्भकायै। आत्मजायै। आदिभूसदनाकारजानुद्वयविराजितायै। आत्मविद्यायै नमः। ६००

ओं इक्षुचापविधात्र्यै नमः। इन्दुकलाधरायै। इन्द्राक्ष्यै। इष्टार्थदायै। इन्द्रायै। इरंमदसमप्रभायै। ईकारचतुरो पेतायै। ईशताण्डवसाक्षिण्यै। उमायै। उग्रभैरवाकारायै। ऊर्ध्वरेतोव्रताङ्गनायै। ऋषिस्तुतायै। ऋतुमत्यै। ऋजुमार्गप्रदर्शिन्यै।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


ऋजुवादन सन्तुष्टायै । लृलॄवर्णमनुस्वनायै । एधमानप्रभायै । एलायै । एकान्तायै । एकपाटलायै नमः । ६२०

ओं एत्यक्षर द्वितीयाङ्ककादिविद्यास्वरूपिण्यै । ऐन्द्रायै । ऐश्वर्यदायै । ओजसे । ओङ्कारार्थप्रदर्शिन्यै । औषधायित साहस्रनाम मन्त्र कदम्बकायै । अम्बायै । अम्भोजनिलयायै । अंशभूतान्य-देवतायै । अर्हणायै । आहवनीयाग्निमध्यगायै । अहमितीरितायै । कल्याण्यै । कत्रयाकारायै । काञ्चीपुरनिवासिन्यै । कात्यायन्यै । कामकलायै । कालमेघाभमूर्धजायै । कान्तायै । काम्यायै नमः । ६४०

ओं कामजातायै नमः । कामाक्ष्यै । किङ्किणीयुतायै । कीनाश नायिकायै । कुब्जकन्यकायै । कुङ्कुमाकृतये । कुल्लुकासेतुसंयुक्तायै । कुरङ्गनयनायै । कुलायै । कूलङ्कषकृपासिन्धवे । कूर्मपीठोपरि-स्थितायै । कृशाङ्ग्यै । कृत्तिवसनायै । क्लींकार्यै । क्लींमनूदितायै । केसरायै । केलिकासारायै । केतकीपुष्पभासुरायै । कैलासवासायै । कैवल्यपदसञ्चारयोगिन्यै नमः । ६६०

ओं कोशाम्बायै । कोपरहितायै । कोमलायै । कौस्तुभा-न्वितायै । कौशिक्यै । कंसदष्टाङ्ग्यै । कञ्चुक्यै । कर्मसाक्षिण्यै । क्षमायै । क्षान्त्यै । क्षितीशाच्यार्यै । क्षीराब्धिकृतवासिन्यै । क्षुरिकास्त्रायै । क्षेत्रसंस्थायै । क्षौमाम्बरसुशुभ्रगायै । खवासायै । खण्डिकायै । खाङ्ककोटिकोटिसमप्रभायै । खिलर्क्सूक्तजपा-सक्तायै । खेटग्रहार्चितान्तरायै नमः । ६८०

ओं खण्डितायै नमः । खण्डपरशुसमाश्लिष्टकलेबरायै । गवय शृङ्गाभिषिक्ताङ्ग्यै । गवाक्ष्यै । गव्यमज्जनायै । गणाधिपप्रसुवे । गम्यायै । गायत्र्यै । गानमालिकायै । गार्हपत्याग्निसंपूज्यायै ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



गिरीशायै । गिरिजायै । गिरे । गीर्वाणी वीजनानन्दायै । गीति शास्त्रानुबोधिन्यै । गुग्गुलोपेतधूपाढ्यायै । गुडान्नप्रीतमानसायै । गूढकोशान्तराराध्यायै । गूढशब्दविनोदिन्यै । गृहस्थाश्रमसंभाव्यायै नमः । ७००

ओं गृहश्रेणीकृतोत्सवायै नमः । गृग्लृशब्दसुविज्ञात्र्यै । गेयगानविगायिन्यै । गैरिकाभरणप्रीतायै । गोमात्रे । गोपवन्दि-तायै । गौर्यै । गौरवत्रैपुण्ड्रायै । गङ्गायै । गन्धर्ववन्दितायै । गह्नायै । गह्वराकार दहरान्तः स्थितायै । घटायै । घटिकायै । घन सारादिनीराजनसमप्रभायै । घारिपूज्यायै । घुसृणभायै । घूर्णिताशेषसैनिकायै । घृघॄघ्लृस्वर सम्पन्नायै । घोरसंसारनाशिन्यै नमः । ७२०

ओं घोषायै नमः । घौषाक्तखड्गास्त्रायै । घण्टामण्डलमण्डितायै । ङकारायै । चतुरायै । चक्र्यै । चामुण्डायै । चारुवीक्षणायै । चिन्तामणिमनुध्येयायै । चित्रायै । चित्रार्चितायै । चित्यै । चिदानन्दायै । चित्रिण्यै । चिदे । चिन्त्यायै । चिदम्बरेश्वर्यै । चीनपट्टांशुकालेपकटिदेशसमन्वितायै । चुलुकीकृतवाराशिमुनि-सेवितपादुकायै । चुम्बितस्कन्दविघ्नेश परमेशप्रियंवदायै नमः । ७४०

ओं चूलिकायै नमः । चूर्णिकायै । चूर्णकुन्तलायै । चेटिका वृतायै । चैत्र्यै । चैत्ररथारूढायै । चोलभूपाल वन्दितायै । चोरितानेक हृत्पद्मायै । चौक्षायै । चन्द्रकलाधरायै । चर्मकृष्णमृगाधिष्ठायै । छत्रचामर सेवितायै । छान्दोग्योपनिषद्गीतायै । छादिताण्डस्व-शाम्बर्यै । छान्दसानां स्वयं व्यक्तायै । छाया मार्ताण्डसेवितायै । छाया पुत्रसमाराध्यायै । छिन्नमस्तावरप्रदायै । जयदायै । जगतीकन्दायै नमः । ७६०

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


जटाधरधृतायै । जयायै । जाह्नव्यै । जातवेदाख्यायै । जापकेष्टहित प्रदायै । जालन्धरासनासीनायै । जिगीषायै । जितसर्वभुवे । जिष्णवे । जिह्वाग्रनिलयायै । जीवन्यै । जीवकेष्टदायै । जुगुप्साढ्यायै । जूत्यै । जूर्णायै । जृम्भकासुर सूदिन्यै । जैत्र्यै । जैवातृकोत्तंसायै । जोटि(ष)ज्ञायै । जोषदायिन्यै नमः । ७८०

झञ्झानिल महावेगायै नमः । झषायै । झर्झर घोषिण्यै । झिण्टीसुमपरप्रेम्णायै । झिल्लिकाकेलिलालितायै । टङ्कहस्तायै । टङ्कितज्यायै । टिट्टरीवाद्यसुप्रियायै । टिट्टिभासन हृत् संस्थायै । ठवर्गचतुराननायै । डमड्डमरुवाद्यूर्ध्वायै । णकाराक्षररूपिण्यै । तत्वज्ञायै । । तरुणीसेव्यायै । तप्तजाम्बूनदप्रभायै । तत्वपुस्तोल्लसत् पाणये । तपनोडुपलोचनायै । तार्तीयभूपुरात्मस्व पादुकायै । तापसेडितायै । तिलकायितसर्वेशनिटिलेक्षणशोभनायै नमः । ८००

ओं तिथये नमः । तिल्लवनान्तःस्थायै । तीक्ष्णायै । तीर्थान्तलिङ्गयुजे । तुलस्यै । तुरगारूढायै । तूलिन्यै । तूर्यवादिन्यै । तृप्तायै । तृणीकृतारातिसेनासंघमहाभटायै । तेजिनीवनमायूर्यै । तैलाद्यैरभिषेचितायै । तोरणाङ्कित नक्षत्रायै । तोटकीवृत्तसन्नुतायै । तौणीरपुष्पविशिखायै । तौर्यत्रिक समन्वितायै । तन्त्रिण्यै । तर्कशास्त्रज्ञायै । तर्कवार्तागिदूरगायै । तर्जन्यङ्गुष्ठ सल्लग्न मुद्राश्चितकराब्जिकायै नमः । ८२०

ओं थकारिण्यै नमः । थां थीं थों थैं कृतलास्यसमर्थकायै । दशाश्वरथ संरूढायै । दक्षिणामूर्ति संयुगायै । दशबाहु प्रियायै । दह्रायै । दशाशाशासनेडितायै । दारकायै । दारुकारण्यवासिन्यै । दिग्विलासिन्यै । दीक्षितायै । दीक्षिताराध्यायै । दीनसन्तापनाशिन्यै । दीपाग्रमङ्गलायै । दीप्तायै । दीव्यद्ब्रह्माण्डमेखलायै । दुरत्ययायै । दुराराध्यायै । दुर्गायै । दुःखनिवारिण्यै नमः । ८४०

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


दूर्वासतापसाराध्यायै नमः । दूत्यै । दूर्वाप्रियप्रसुवे । दृष्टान्तरहितायै । देवमात्रे । दैत्यविभंजिन्यै । दैविकागार यन्त्रस्थायै । दोर्द्वंद्वातीतमानसायै । दौर्भाग्यनाशिन्यै । दौत्यै । दौवारिक निधिद्धय्यै । दण्डिनी मन्त्रिणी मुख्यायै । दहराकाश मध्यगायै । दर्भारण्य कृतावासायै । दहविद्याविलासिन्यै । धन्वन्तरीड्यायै । धनदायै । धारासाहस्रसेचनायै । धेनुमुद्रायै । धेनुपूज्यायै नमः । ८६०

ओं धैर्यायै नमः । धौम्यनुति प्रियायै । नमितायै । नगरावासायै । नट्यै । नलिनपादुकायै । नकुल्यै । नाभिनालाग्रायै । नाभावष्टदलाब्जिन्यै । नारिकेलामृतप्रीतायै । नारी संमोहनाकृतये । निगमाश्वरथारूढायै । नीललोहितनायिकायै । नीलोत्पल प्रियायै । नीलायै । नीलाम्बायै । नीपवाटिकायै । नुतकल्याण वरदायै । नूतनायै । नृपपूजितायै नमः । ८८०

ओं नृहरिस्तुतहृत् पूर्णायै । नृत्तेश्यै । नृत्तसाक्षिण्यै । नैगमज्ञानसंसेव्यायै । नैगमज्ञान दुर्लभायै । नौकारूढेश वामोरु वीक्षितस्थिर सुन्दर्यै । नन्दिविद्यायै । नन्दिकेशविनुतायै । नन्दनाननायै । नन्दिन्यै । नन्दजायै । नम्यायै । नन्दिताशेष-भूपुरायै । नर्मदायै । परमाद्वैतभावितायै । परिपन्थिन्यै । परायै । परीतदिव्यौघायै । परशम्भुपुराह्निकायै । पथ्यायै नमः । ९००

ओं परब्रह्मपत्न्यै नमः । पतञ्जलिसुपूजितायै । पद्माक्ष्यै । पद्मिन्यै । पद्मायै । परमायै । पद्मगन्धिन्यै । पयस्विन्यै । परेशानायै । पद्मनाभ सहोदर्यै । परार्धायै । परमैश्वर्यकारणायै । परमेश्वर्यै । पातञ्जलाख्य कल्पोक्तशिवावरण संयुतायै । पाशकोदण्ड सुमभृते । पारिपार्श्वकसन्नुतायै । पिञ्छा विलेपसुमुखायै । पितृतुल्यायै । पिनाकिन्यै । पीतचन्दनसौगन्धायै नमः । ९२०

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


ओं पीताम्बर सहोद्भवायै । पुण्डरीकपुरीमध्यवर्तिन्यै । पुष्टिवर्धिन्यै । पूरयन्त्यै । पूर्यमाणायै । पूर्णाभायै । पूर्णिमान्तरायै। पृच्छामात्राति शुभदायै । पृथ्वीमण्डलशासिन्यै । पूतनायै । पेशलायै । पेरुमण्डलायै। पैत्ररक्षक्यै। पौष्यै। पौष्ट्रेक्षु कोदण्डायै । पञ्चपञ्चाक्षरीमनवे । पञ्चमीतिथिसंभाव्यायै । पञ्चकोशान्तर-स्थितायै । फणाधिपसमाराध्यायै। फणामणिविभूषितायै नमः। ९४०

ओं बकपुष्पकृतोत्तंसायै नमः। बगलायै। बलिन्यै। बलायै। बालार्कमण्डलाभासायै। बालायै। बालविनोदिन्यै। बिन्दुचक्र-शिवाङ्कस्थायै। बिल्वभूषितमूर्धजायै। बीजापूरफलासक्तायै। बीभत्सावहदृक्त्रय्यै। बुभुक्षा। वर्जितायै। बुद्धिसाक्षिण्यै। बुधवर्षकायै। बृहत्यै। बृहदारण्यनुतायै। बृहस्पती डितायै। बेराख्यायै। बैन्दवाकारवैरिञ्चसुषिरान्तरायै। बोद्ध्र्यै नमः। ९६०

ओं बोधायनायै नमः। बौद्ध दर्शनायै। बन्धमोचिन्यै। भट्टारिकायै। भद्रकाल्यै। भारतीभायै। भिषग्वरायै। भित्तिकायै। भिन्नदैत्याङ्गायै। भिक्षाटनसहानुगायै। भीषणायै। भीतिरहितायै। भुवनत्रय शङ्करायै। भूतघ्न्यै। भूत दमन्यै। भूतेशालिङ्गनोत्सुकायै। भूतिभूषितसर्वाङ्ग्यै। भृग्वङ्गिर मुनिप्रियायै। भृङ्गिनाट्य-विनोदज्ञायै। भैरवप्रीतिदायिन्यै नमः। ९८०

ओं भोगिन्यै नमः। भोगशमन्यै। भोगमोक्षप्रदायिन्यै। भौमपूज्यायै। भण्डहन्त्र्यै। भग्नदक्षक्रतुप्रियायै। मकारपञ्चम्यै। मह्यायै। मदन्यै। मकरध्वजायै। मत्स्याक्ष्यै। मधुरावासायै। मन्वश्रहृदयाश्रयायै। मार्ताण्डविनुतायै। माणिभद्रेड्यायै। माधवार्चितायै। मायायै। मारप्रियायै। मारसखीड्यायै। माधुरीमनसे नमः। १०००

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



ओं माहेश्वर्यै नमः । माहिषघ्न्यै । मिथ्यावादप्रणाशिन्यै । मीनाक्ष्यै । मीनसंसृष्टायै । मीमांसाशास्त्रलोचनायै । मुग्धाङ्ग्यै । मुनिबृन्दार्च्यायै । मुक्तिदायै । मूलविग्रहायै । मूषिकारूढजनन्यै । मूढभक्तिमदर्चितायै । मृत्युञ्जयसत्यै । मृग्यायै । मृगालेपन लोलुपायै । मेधाप्रदायै । मेखलाढ्यायै । मेघवाहनसेवितायै । मेनात्मजायै । मैथिलीशकृतार्चनपदाम्बुजायै नमः । १०२०

ओं मैत्र्यै नमः । मैनाकभगिन्यै । मोहजालप्रणाशिन्यै । मोदप्रदायै । मौलिगेन्दुकलाधरकिरीटभाजे । मौहूर्तलग्नवरदायै । मञ्जीरायै । मञ्जुभाषिण्यै । मर्मज्ञात्र्यै । महादेव्यै । यमुनायै । यज्ञसंभावायै । यातनारहितायै । यानायै । यामिनीपूजकेष्टदायै । युक्तायै । यूपायै । यूथिकार्च्यायै । योगायै । योगेशयोगदायै (यक्षराजसखान्तरायै) नमः । १०४०

ओं । रथिन्यै नमः । रजन्यै । रत्नगर्भायै । रक्षितभूरुहायै । रमायै । रसक्रियायै । रश्मिमाला-सन्नुतवैभवायै । रक्तायै । रसायै । रत्यै । रथ्यायै । रणन्मञ्जीरनू-पुरायै । रक्षायै । रविध्वजाराध्यायै । रमण्यै । रविलोचनायै । रसज्ञायै । रसिकायै । रक्तदन्तायै । रक्षणलम्पटायै नमः । १०६०

ओं रक्षोघ्नजपसन्तुष्टायै । रक्ताङ्गापाङ्गलोचनायै । रत्नद्वीपव-नान्तस्थायै । रजनीशकलाधरायै । रत्नप्राकारनिलयायै । रणमध्यायै । रमार्थदायै । रजनीमुखसंपूज्यायै । रत्नसानुस्थितायै । रय्यै नमः । १०७०

———*———

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


# श्रीप्रणवसहस्रनामावलिः

अस्य श्रीप्रणवसहस्रनामस्तोत्रमहामन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, परमात्मा देवता, अं बीजं, उं शक्तिः, मं कीलकं, आत्मज्ञानसिद्ध्यै जपे विनियोगः । ध्यानं-

ओंकारं निगमैकवेद्यमनिशं वेदान्ततत्वास्पदं
चोत्पत्तिस्थितिनाशहेतुममलं विश्वस्य विश्वात्मकम् ।
विश्वत्राणपरायणं श्रुतिशतैस्संप्रोच्यमानं प्रभुं
सत्यं ज्ञानमनन्तमूर्तिममलं शुद्धात्मकं तं भजे ॥

ओं । ओङ्काराय नमः । तारकाय । सूक्ष्माय । प्राणाय । सर्वगोचराय । क्षाराय । क्षितये । उत्पत्तिहेतुकाय । नित्याय । निरत्ययाय । शुद्धाय । निर्मलात्मने । निराकृतये । निराधाराय । सदानन्दाय । शाश्वताय । परतः परस्मै । मनसो गतिनिहन्त्रे । गम्यानामुत्तमोत्तमाय । अकारात्मने नमः ॥ २० ॥

ओं मकारात्मने नमः । बिन्दुरूपिणे । कलाधराय । उकारात्मने । महावेद्याय । महापातकनाशनाय । इन्द्राय । परतराय । वेदाय । वेदवेद्याय । जगद्गुरवे । वेदकृते । वेदवेत्रे । वेदान्तार्थस्वरूपकाय । वेदान्तवेद्याय । नतुलाय । कंजजन्मने । कामाकृतये । खरूपिणे । खगवाहिने नमः ॥ ४० ॥

ओं खगाय नमः । खगतराय । खाद्याय । खभूताय । खगताय । खगमाय । खगनायकाय । खरमाय । खजलाय । खालाय । खगेश्वराय । खगवाहाय । गन्त्रे । गमयित्रे । गम्याय । गमनातिकराय । गतये । घण्टानिनादाय । घण्टेयपरानन्दनाय । घण्टानादपराय नमः ॥ ६० ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


ओं घण्टानादवते नमः। गुणाय। घस्राय। घनितचिद्रूपाय। घनानां जलदायकाय। चर्यापूज्याय। चिदानन्दाय। चिराचिरतराय। चितये। चितिदाय। चितिगन्त्रे। चर्मवते। चलनाकृतये। चञ्चलाय। चालकाय। चाल्याय। छायावते। छादनात्यययाय। छायाच्छायाय। प्रतिच्छायाय नमः॥ ८०॥

ओं जंजपूकाय नमः। महामतये। जालग्राह्याय। जलाकाराय। जालिने। जालविनायकाय। झटिति प्रतिधौरेयाय। झञ्झामारुतसेविताय। टङ्काय। टंककर्त्रे। टङ्ककार्यवशानुगाय। टिट्टिलाय। निष्ठुराय। कृष्टाय। कमठाय। पृष्ठगोचराय। काठिन्यात्मने। कठोरात्मने। कण्ठाय। कौटीरगोचराय नमः॥ १००॥

ओं डमरुध्वानसानन्दाय नमः। डांभिकानां पराङ्मुखाय। डंभेतरसमाराध्याय। डांभिकानां विडंबनाय। ढक्काकल-कलध्वानाय। अणिम्ने। अनुत्तमसुन्दराय। तारतम्यफलाय। तल्पाय। तल्पशायिने। सतारकाय। तर्तव्याय। तारणाय। ताराय। तारकानाथभूषणाय। हिरण्यबाहवे। सेनान्ये। देशानां च दिशां पतये। पीतवर्णाय। महावृक्षाय नमः॥ १२०॥

ओं हरिकेशाय नमः। उपवीतवते। स्तायूनामग्रण्ये। श्रीमते। निचेरवे। परिचारिकाय। बिल्मिने। कवचिने। वर्मिणे। मत्तोभगणिरूथवते। वञ्चकाय। परिवञ्चिने। कर्माराय। कुंभकारकाय। पक्षिपुंजोपजीविने। मृगयवे। श्रुतकाय। नयाय। भक्तपापमहद्रापये। दरिद्राय नमः॥ १४०॥

ओं नीललोहिताय नमः। मीढ्वते। मीढुष्टमाय। शंभवे। शत्रुव्याधिने। बभ्लुशाय। स्तोकादिरक्षकाय। कर्त्रे। वाट्याय।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


उर्वर्याय । आलाद्याय । नाथाय । सूद्याय । हेतिसाहस्रसंयुताय । सृकाहस्ताय । महापद्माय । शरव्यायुतमण्डनाय । सर्वोपहत-कामाय । जरित्रस्थप्रतारकाय । अन्नबाणाय नमः ।। १६० ।।

ओं वातबाणाय नमः । वर्षबाणकरांबुजाय । दशप्राच्यादि-वन्द्याय । सस्पिंजरकलेबराय । जपैकशीलाय । संजप्याय । समजग्धये । सपीतकाय । यमादिकुशलाय । गौराय । दिवारात्रैकवृष्टिदाय । पश्चावये । अवये । दित्यौहे । तुर्यौहे । पष्ठौहे । वेहताय । नाथाय । द्युम्नवाजादिनायकाय । अभिरक्ताय नमः ।। १८० ।।

ओं वीचीवक्त्राय नमः । वेदानां हृदयाब्जगाय । आनिर्ह-ताय । विक्षीणाय । लोप्याय । उलप्याय । गुरमाणाय । पर्णशद्याय । सूर्म्याय । ऊर्मये । ओं । अयाय । शिवाय । शिवतमाय । शास्त्रे । घोराघोरतनुद्वयाय । गिरिपर्वतनाथाय । शिपिविष्टाय । पशोः पतये । अप्रगल्भाय नमः ।। २००

ओं प्रगल्भाय नमः । मल्लानां नायकोत्तमाय । प्रहिताय । प्रमृशाय । दूताय । क्षत्रे । स्यन्दनमध्यगाय । स्थपतये । ककुभाय । वन्याय । कक्ष्याय । पतंजलये । सूताय । हंसाय । निहन्त्रे । कपर्दिने । पिनाकवते । आयुधाय । स्वायुधाय । कृत्तिवाससे नमः ।। २२० ।।

ओं जितेन्द्रियाय नमः । यातुधाननिहन्त्रे । कैलासे दक्षिणे स्थिताय । सुवर्णमुखीतीरस्थाय । वृद्धाचलनितम्बगाय । मणिमुक्तामयोद्भासिने । कट्याय । काट्याय । महाद्रिधृते । हृदयाय । निवेष्प्याय । हरित्याय । शुष्क्याय । सिकत्याय । प्रवाह्याय । भवरुद्रादिनामवते । भीमाय । भीमपराक्रान्ताय । विक्रान्ताय । सपराक्रमाय नमः ।। २४० ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


ओं शूराय नमः । शूरनिहन्त्रे । मन्युमते । मन्युनाशनाय । भामिताय । भामवते । भामाय । उक्ष्णे । उक्षितरक्षकाय । हविष्मते । मखवते । मखानां फलदायकाय । अघघ्नाय । दोषजालघ्नाय । व्याध्यामयविनाशनाय । सुम्नरूपाय । असुम्नरूपाय । जगन्नाथाय । अधिवाचकाय । व्राताय नमः ॥ २६० ॥

ओं व्रातनाथाय नमः । व्रात्याय । व्रात्यादिदूरगाय । ब्रह्मदत्ताय । चेकितानाय । देवदत्ताय । अतिसंमताय । श्रमणाय । अश्रमणाय । पुण्याय । पुण्यफलाय । आश्रमाणां फलप्रदाय । कालाय । कालयित्रे । कल्याय । कालकालाय । कलाधराय । धनुष्मते । इषुमते । धन्वाविने नमः ॥ २८० ॥

ओं आततायिने नमः । सत्यादिनिलयाधाराय । काकुराय । काकुवते । बलाय । राकाकालविधात्रे । विश्वरक्षैकदक्षिणाय । अग्रेवधाय । दूरेवधाय । शंतमाय । मयस्कराय । कालभावाय । कालकर्त्रे । ऋचां भावैकवेदनाय । यजुषां सर्वमर्मस्थाय । साम्नां सारैकगोचराय । अङ्गिरसे । पूर्वस्मै । अवध्याय । ब्राह्मणमध्यगाय नमः ॥ ३०० ॥

ओं मुक्तानां गतये नमः । पुण्यापुण्यहराय । हराय । उक्थ्याय । उक्थ्यकाराय । उक्थिने । ब्रह्मणे । क्षत्राय । विशे । अन्तिमाय । धर्माय । धर्महराय । धर्म्याय । धर्मिणे । धर्मपरायणाय । नित्याय । अनित्याय । क्षराय । क्षान्ताय । वेगवते नमः ॥ ३२० ॥

ओं अमिताशनाय नमः । पुण्यवते । पुण्यकृते । पूताय । पुरुहूताय । पुरुष्टुताय । अर्चिष्मते । अर्चिताय । कुंभाय । कीर्तिमते । कीर्तिदाय । अफलाय । स्वाहाकाराय । वषट्काराय । हन्तकाराय । स्वधाभिधाय । भूतकृते । भूतभृते । भर्त्रे । द्विबर्हाय नमः ॥ ३४० ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


ओं द्वंद्वनाशनाय नमः । मुनये । पित्रे । विराजे । वीराय । देवाय । दिनेश्वराय । तारकायै । तारकाय । तूर्णाय । तिग्मरश्मये । त्रिनेत्रवते । तुल्याय । तुल्यहराय । अतुल्याय । त्रिलोकीनायकाय । त्रुटये । तत्रें । तार्याय । त्रिभुवनीतीर्णाय नमः ॥ ३६० ॥

ओं तीराय नमः । तीरण्ये । सतीराय । तीरगाय । तीव्राय । तीक्ष्णरूपिणे । तीव्रिणे । अर्थाय । अनर्थाय । असमर्थाय । तीर्थरूपिणे । तीर्थकाय । दायदाय । देयदात्रे । परि(प्र)पूजिताय । दायभुजे । दायहन्त्रे । दामोदरगुणांबुधये । धनदाय । धनविश्रान्ताय नमः ॥ ३८० ॥

ओं अधनदाय नमः । धननाशकाय । निष्ठुराय । नारशायिने । नेत्रे । नायकाय । उत्तमाय । नैकाय । अनेककराय । नाव्याय । नारायणसमाय । प्रभवे । नूपुराय । नूपुरिणे । नेयाय । नरनारायणाय । उत्तमाय । पात्रे । पालयित्रे । पेयाय नमः ॥ ४००

ओं पिबते नमः । सागरपूर्णिम्ने । पूर्वाय । अपूर्वाय । पूर्णिम्ने । पुण्यमानसलालसाय । पेपीयमानाय । पापघ्नाय । पञ्चयज्ञमयाय । पुरवे । परमात्मने । परेशाय । पावनात्मने । परात्पराय । पञ्चबुद्धिमयाय । पञ्चप्रयाजादिमयाय । परस्मै । प्राणभृते । प्राणघ्ने । प्राणाय नमः ॥ ४२० ॥

ओं प्राणहृते नमः । प्राणचेष्टिताय । पञ्चभूतमयाय । पञ्चकरणैश्चोपबृंहिताय । प्रेयसे । प्रेयस्तमाय । प्रीताय । प्रेयस्विने । प्रेयसीरताय । पुरुषार्थाय । पुण्यशीलाय । पुरुषाय । पुरुषोत्तमाय । फलाय । फलस्य दात्रे । फलानामुत्तमोत्तमाय । बिंबाय । बिंबात्मकाय । बिंबिने । बिंबिनीमानसोल्लासाय नमः ॥ ४४० ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



ओं बधिराय नमः। अबधिराय। बालाय । बाल्यावस्थाय । बलप्रियाय। एकस्मै। द्वयिने। दशबलाय । पञ्चकिने। अष्टकिने। पुंसे। भगाय। भगवते। फल्गवे । भाग्याय। भल्लाय। मण्डिताय । भवते। भवदायादाय। भवाय नमः ॥ ४६० ॥

ओं भुवे नमः । भूमिदैवताय । भवान्ये । भवविद्वेषिणे । भूतनित्याय । प्रचारिताय । भाषायै । भाषयित्रे । भाष्याय । भावकृते । भाष्यवित्तमाय। मन्दाय। मलिनविच्छेदाय। मालिने । मालायै। मरुते। गरुते। मूर्तिमते। अपुनर्वेद्याय। मुनिबृंदाय नमः ॥ ४८० ॥

ओं मुनीश्वराय नमः । मरवे । मरुजालाय । मेरवे । मरुद्गणनिषेविताय । मर्यादास्थापनाध्यक्षाय । मर्यादाप्रविभं-जनाय । मान्यमानयित्रे। मान्याय। मानदाय। मानगोचराय। यास्काय। यूने। यौवनाढ्याय। युवतीभिः पुरस्कृताय। वामन्ये। भामन्ये। भारूपाय। भास्करद्युतये। संयद्वामाय नमः ॥ ५०० ॥

ओं महावामाय नमः । सिद्धये । संसिद्धिकल्पनाय । सिद्धसङ्कल्पाय। एनोघ्नाय। अनूचानाय। महामनसे। वामदेवाय । वसिष्ठाय । ज्येष्ठाय। श्रेष्ठाय। महेश्वराय । मन्त्रिणे। वाणिजाय । दिव्याय । भुवन्तये । वारिवस्कृताय । कार्यकारणसंधात्रे । निदानाय । मूलकारणाय नमः ॥ ५२० ॥

ओं अधिष्ठानाय नमः । विश्रमाढ्याय । अविवर्ताय । केवलाय । अणिम्ने । महिम्ने । वेत्रे । प्रथिम्ने । पृथुलाय । पृथवे । जीवाय। जैवाय। प्राणधर्त्रे। करुणाय। मैत्रिकाय। बुधाय । ऋचां जालाय। ऋचां कर्त्रे । ऋङ्मुखाय। ऋषिमण्डलाय नमः ॥ ५४०

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



ओं रूढाय नमः । रूढिने । रुड्भुवे । रूढिनिष्ठाय । रूपविवर्जिताय । स्वराय । हलाय । हल्याय । स्पर्शाय । ऊष्मणे । आन्तराय । विशोकाय । विमोहाय । यस्मै । तस्मै । जगन्मयाय । एकस्मै । अनेकाय । पीड्याय । शतार्धाय नमः ॥ ५६० ॥

ओं शताय नमः । बृहते । सहस्रार्धाय । सहस्राय । इन्द्रगोपाय । पङ्कजाय । पद्मनाभाय । सुराध्यक्षाय । पद्मगर्भाय । प्रतापवते । वासुदेवाय । जगन्मूर्तये । संधात्रे । धातवे । उत्तमाय । रहस्याय । परमाय । गोप्याय । गुह्याय । अद्वैतविस्मिताय नमः ॥ ५८० ॥

ओं आश्चर्याय नमः । अतिगंभीराय । जलबुद्बुदसागराय । संसारविषपीयूषाय । भववृश्चिकमान्त्रिकाय । भवगर्तसमुद्धर्त्रे । भवव्याघ्रवशंकराय । भवग्रहमहामन्त्राय । भवभूतविनाशनाय । पद्ममित्राय । पद्मबन्धवे । जगन्मित्राय । कवये । मनीषिणे । परिभुवे । याथातथ्यविधायकाय । दूरस्थाय । अन्तिकस्थाय । शुभ्राय । अकायाय नमः ॥ ६०० ॥

ओं अव्रणाय नमः । कौषीतिकिने । तलवकाराय । नानाशाखाप्रवर्तकाय । उद्गीथाय । परमोद्गात्रे । शस्त्राय । स्तोमाय । मखेश्वराय । अश्वमेधाय । क्रतूच्छ्रायाय । क्रतवे । क्रतुमयाय । अक्रतवे । पृषदाज्याय । वसन्ताज्याय । ग्रीष्माय । शरदे । हविषे । ब्रह्मताताय नमः ॥ ६२० ॥

ओं विराट्ताताय नमः । मनुताताय । जगत्ताताय । सर्वताताय । सर्वधात्रे । जगद्बुध्नाय । जगन्निधये । जगद्वीचीतरङ्गाणामांधाराय । पदाय । जगत्कल्लोलपाथोधये । जगदङ्कुरकंदकाय । जगद्वल्लीमहाबीजाय । जगत्कंदसमुद्धराय । सर्वोपनिषदां कंदाय । मूलकन्दाय । मुकुन्दाय । एकाम्रनायकाय । धीमते । जंबुकेशाय । महातटाय नमः ॥ ६४० ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


ओं न्यग्रोधाय नमः । उदुंबराय । अश्वत्थाय । कूटस्थाय । स्थाणवे । अद्भुताय । अतिगम्भीरमहिम्ने । चित्रशक्तये । विचित्रवते । चित्रवैचित्र्याय । मायाविने । माययावृताय । कपिंजलाय । पिंजराय । चित्रकूटाय । महारथाय । अनुग्रहपदाय । बुद्धये । अमृताय । हरिवल्लभाय नमः ॥ ६६० ॥

ओं पद्मप्रियाय नमः । परमात्मने । पद्महस्ताय । पद्माक्षाय । पद्मसुन्दराय । चतुर्भुजाय । चन्द्ररूपाय । चतुरानन-रूपभाजे । आह्लादजनकाय । पुष्टये । शिवार्धाङ्गविभूषणाय । दारिद्र्यश-मनाय । प्रीताय । शुक्लमाल्यांबरावृताय । भास्कराय । बिल्वनि-लयाय । वराहाय । वसुधापतये । यशस्विने । हेममालिने नमः ॥ ६८०

ओं धनधान्यकराय नमः । वसवे । वसुप्रदाय । हिरण्याङ्-गाय । समुद्रतनयार्चिताय । दारिद्र्यध्वंसनाय । देवाय । सर्वोपद्रववारणाय । त्रिकालज्ञानसंपन्नाय । ब्रह्मविष्णुशिवा-त्मकाय । रात्रये । प्रभायै । यज्ञरूपाय । भूतये । मेधाविचक्षणाय । प्रजापतये । महेन्द्राय । सोमाय । धनेश्वराय । पितृभ्यो नमः ॥ ७०० ॥

ओं वसुभ्यो नमः । वायवे । वह्नये । प्राणेभ्यः । ऋतवे । मनवे । आदित्याय । हरिदश्वाय । तिमिरोन्मथनाय । अंशुमते । तमोऽभिघ्नाय । लोकसाक्षिणे । वैकुण्ठाय । कमलापतये । सनातनाय । लीलामानुषविग्रहाय । अतीन्द्राय । ऊर्जिताय । प्रांशवे । उपेन्द्राय नमः ॥ ७२० ॥

ओं वामनाय नमः । बलये । हंसाय । व्यासाय । संभवाय । भवाय । भवपूजिताय । नैकरूपाय । जगन्नाथाय । जितक्रोधाय ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



प्रमोदनाय । अगदाय । मन्त्रविदे । रोगहर्त्रे । प्रभावनाय । चण्डांशवे । शरण्याय । श्रीमते । अतुलविक्रमाय । ज्येष्ठाय नमः ॥ ७४० ॥

ओं शक्तिमतां नाथाय नमः । प्राणिनां प्राणदायकाय । मत्स्यरूपाय । कुंभकर्णप्रभेत्रे । विश्वमोहनाय । लोकत्रयाश्रयाय । वेगिने । बुधाय । श्रीदाय । सतां गतये । शब्दातिगाय । गभीरात्मने । कोमलाङ्गाय । प्रजागराय । वर्णश्रेष्ठाय । वर्णबाह्याय । कर्मकर्त्रे । समदुःख सुखाय । राशये । विशेषाय नमः ॥ ७६० ॥

ओं विगतज्वराय नमः । देवादिदेवाय । देवर्षये । देवासुराभयप्रदाय । सर्वदेवमयाय । शार्ङ्गपाणये । उत्तमविग्रहाय । प्रकृतये । पुरुषाय । अजय्याय । पावनाय । ध्रुवाय । आत्मवते । विश्वंभराय । सामगेयाय । क्रूराय । पूर्वाय । कलानिधये । अव्यक्त लक्षणाय । व्यक्ताय नमः ॥ ७८० ॥

ओं कलारूपाय नमः । धनंजयाय । जयाय । जरारये । निश्शब्दाय । प्रणवाय । स्थूलसूक्ष्मविदे । आत्मयोनये । वीराय । सहस्राक्षाय । सहस्रपदे । सनातनतमाय । स्रग्विणे । गदापद्मरथाङ्ग-धृते । चिद्रूपाय । निरीहाय । निर्विकल्पाय । सनातनाय । शतमूर्तये । सहस्राक्षाय नमः ॥ ८०० ॥

ओं घनप्रज्ञाय नमः । सभापतये । पुण्डरीकशयाय । विप्राय । द्रवाय । उग्राय । कृपानिधये । अधर्मशत्रवे । अक्षोभ्याय । ब्रह्मगर्भाय । धनुर्धराय । गुरुपूजारताय । सोमाय । कपर्दिने । नीललोहिताय । विश्वमित्राय । द्विजश्रेष्ठाय । रुद्राय । स्थाणवे । विशांपतये नमः ॥ ८२० ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


ओं वालखिल्याय नमः । चण्डाय । कल्पवृक्षाय । कलाधराय । शङ्खाय । अनिलाय । सुनिष्पन्नाय । शूराय । कव्यहराय । गुरवे । पवित्रपादाय । पापारये । दुर्धराय । दुस्सहाय । अभयाय । अमृताशयाय । अमृतवपुषे । वाङ्मयाय । सदसन्मयाय । निदानगर्भाय नमः ।। ८४० ।।

ओं निर्व्याजाय नमः । मध्यस्थाय । सर्वगोचराय । हृषीकेशाय । केशिघ्ने । प्रीतिवर्धनाय । वामनाय । दुष्टदमनाय । धृतये । कारुण्यविग्रहाय । सन्यासिने । शास्त्रतत्त्वज्ञाय । व्यासाय । पापहराय । बदरीनिलयाय । शान्ताय । भूतावासाय । गुहाश्रयाय । पूर्णाय । पुराणाय नमः ।। ८६० ।।

ओं पुण्यज्ञाय नमः । मुसलिने । कुण्डलिने । ध्वजिने । योगिने । जेत्रे । महावीर्याय । शास्त्रिणे । शास्त्रार्थतत्त्वविदे । वहनाय । शक्तिसंपूर्णाय । स्वर्गदाय । मोक्षदायकाय । सर्वात्मने । लोकलोकज्ञाय । सर्गस्थित्यन्तकारकाय । सर्वलोकसुखाकाराय । क्षयवृद्धिविवंर्जिताय । निर्लेपाय । निर्गुणाय नमः ।। ८८० ।।

ओं सूक्ष्माय नमः । निर्विकाराय । निरंजनाय । अचलाय । सत्यवादिने । लोहिताक्षाय । यूने । अध्वराय । सिंहस्कन्धाय । महासत्त्वाय । कालात्मने । कालचक्रभृते । परस्मै ज्योतिषे । विश्वदृशे । विश्वरोगघ्ने । विश्वात्मने । विश्वभूताय । सुहृदे । शान्ताय । विकण्टकाय नमः ।। ९०० ।।

ओं सर्वगाय नमः । सर्वभूतेशाय । सर्वभूताशयस्थिताय । आभ्यन्तरतमश्छेत्रे । पत्यै । अजाय । हरये । नेत्रे । सदानताय । कर्त्रे । श्रीमते । धात्रे । पुराणदाय । स्रष्ट्रे । विष्णवे । देवदेवाय । सच्चिदाश्रयाय । नित्याय । सर्वगताय । भानवे नमः ।। ९२० ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



ओं उग्राय नमः । प्रजेश्वराय । सवित्रे । लोककृते । हव्यवाहनाय । वसुधापतये । स्वामिने । सुशीलाय । सुलभाय । सर्वज्ञाय । सर्वशक्तिमते । नित्याय । संपूर्णकामाय । कृपापीयूष सागराय । अनन्ताय । श्रीपतये । रामाय । निर्गुणाय । लोकपूजिताय । राजीवलोचनाय नमः ।। ९४० ।।

ओं श्रीमते नमः । शरणत्राणतत्पराय । सत्यव्रताय । व्रतधराय । साराय । वेदान्तगोचराय । त्रिलोकीरक्षकाय । यज्वने । सर्वदेवादिपूजिताय । सर्वदेवस्तुताय । सौम्याय । ब्रह्मण्याय । मुनिसंस्तुताय । महते । योगिने । सर्वपुण्यविवर्धनाय । स्मृतसर्वाघनाशनाय । पुरुषाय । महते । पुण्योदयाय नमः ।। ९६०

ओं महादेवाय नमः । दयासाराय । स्मिताननाय । विश्वरूपाय । विशालाक्षाय । बभ्रवे । परिबृढाय । दृढाय । परमेष्ठिने । संत्यसाराय । सत्यसंधानाय । धार्मिकाय । लोकज्ञाय । लोकवंद्याय । सेव्याय । लोककृते । पराय । जितमायाय । दयाकाराय । दक्षाय नमः ।। ९८० ।।

ओं सर्वजनाश्रयाय नमः । ब्रह्मण्याय । देवयोनये । सुन्दराय । सूत्रकारकाय । महर्षये । ज्योतिर्गणनिषेविताय । सुकीर्तये । आदये । सर्वस्मै । सर्वावासाय । दुरासदाय । स्मितभाषिणे । निवृत्तात्मने । धीरोदात्ताय । विशारदाय । अध्यात्मयोगनिलयाय । सर्वतीर्थमयाय । सुराय । यज्ञस्वरूपिणे नमः ।। १०००

ओं यज्ञज्ञाय नमः । अनन्तदृष्टये । गुणोत्तराय नमः ।। १००३

* * *

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



# श्रीदक्षिणामूर्तिसहस्रनामस्तोत्रम्

आदिदेवो दयासिन्धुरखिलागमदेशिकः ।
दक्षिणामूर्तिरतुलः शिक्षितासुरविक्रमः ॥ १ ॥

कैलासशिखरोल्लासी कमनीयनिजाकृतिः ।
वीरासनसमासीनो वीणापुस्तलसत्करः ॥ २ ॥

अक्षमालालसत्पाणिश्चिन्मुद्रितकरांबुजः ।
अपस्मारोपरिन्यस्तसव्यपादसरोरुहः ॥ ३ ॥

चारुचामीकराकारजटालार्पितचन्द्रमाः ।
अर्धचन्द्राभनिटिलपाटीरतिलकोज्ज्वलः ॥ ४ ॥

करुणालहरीपूर्ण कर्णान्तायतलोचनः ।
कर्णदिव्योल्लसद्दिव्यमणिकुण्डलमण्डितः ॥ ५ ॥

वरवज्रशिलादर्शपरिभाविकपोलभूः ।
चारुचांपेयपुष्पाभनासिकापुटरंजितः ॥ ६ ॥

दन्तालिकुसुमोत्कृष्टकोमलाधरपल्लवः ।
मुग्धस्मितपरीपाकप्रकाशितरदाङ्कुरः ॥ ७ ॥

अनाकलितसादृश्यचिबुकश्रीविराजितः ।
अनर्घरत्नग्रैवेय विलसत्कंबुकन्धरः ॥ ८ ॥

माणिक्यकंकणोल्लासि करांबुजविराजितः ।
मुक्ताहारलसत्तुङ्ग विपुलोरस्कराजितः ॥ ९ ॥

आवर्तनाभिरोमालिवलित्रययुतोदरः ।
विशङ्कटकटिन्यस्त वाचाल मणिमेखलः ॥ १० ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



करिहस्तोपमेयोरुरादर्शोज्ज्वलजानुकः ।
कन्दर्पतूणीजिज्जंघो गुल्फोदञ्चितनूपुरः ॥ ११ ॥

मणिमंजीर किरण किंजल्कितपदांबुजः ।
शाणोल्लीढमणिश्रेणीरम्यांघ्रिनखमण्डलः ॥ १२ ॥

आपादकर्णकामुक्तभूषाशतमनोहरः ।
सनकादिमहायोगिसमाराधितपादुकः ॥ १३ ॥

यक्षकिन्नरगन्धर्वस्तूयमानात्मवैभवः ।
ब्रह्मादिदेवविनुतो योगमायानियोजकः ॥ १४ ॥

शिवयोगी शिवानन्दः शिवभक्तिसमुत्तरः ।
वेदान्तसारसन्दोहः सर्वसत्वावलंबनः ॥ १५ ॥

वटमूलाश्रयो वाग्मी मान्यो मलयजप्रियः ।
सुखदो वाञ्छितार्थज्ञः प्रसन्नवदनेक्षणः ॥ १६ ॥

कर्मसाक्षी कर्ममा(या)यी सर्वकर्मफलप्रदः ।
ज्ञानदाता सदाचारः सर्वपापविमोचनः ॥ १७ ॥

अनाथनाथो भगवान् आश्रितामरपादपः ।
वरप्रदः प्रकाशात्मा सर्वभूतहिते रतः ॥ १८ ॥

व्याघ्रचर्मासनासीनः आदिकर्ता महेश्वरः ।
सुविक्रमः सर्वगतो विशिष्टजनवत्सलः ॥ १९ ॥

चिन्ताशोकप्रशमनो जगदानन्द कारकः ।
रश्मिमान् भुवनेशानो देवासुर सुपूजितः ॥ २० ॥

मृत्युंजयो व्योमकेशः षट्त्रिंशत्तत्वसंग्रहः ।
अज्ञातसंभवो भिक्षुरद्वितीयो दिगंबरः ॥ २१ ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


समस्तदेवतामूर्तिः सोमसूर्याग्निलोचनः ।
सर्वसाम्राज्यनिपुणो धर्ममार्गप्रवर्तकः ॥ २२ ॥

विश्वाधिकः पशुपतिः पशुपाशविमोचकः ।
अष्टमूर्तिर्दीप्तमूर्तिर्नामोच्चारणमुक्तिदः ॥ २३ ॥

सहस्रादित्यसङ्काशः सदाषोडशवार्षिकः ।
दिव्यकेलीसमायुक्तो दिव्यमाल्यांबरावृतः ॥ २४ ॥

अनर्घरत्नसंपूर्णो मल्लिकाकुसुमप्रियः ।
तप्तचामीकराकारः क्रुद्धदावानलाकृतिः ॥ २५ ॥

निरंजनो निर्विकारो निजा(रा)वासो निराकृतिः ।
जगद्गुरुर्जगत्कर्ता जगदीशो जगत्पतिः ॥ २६ ॥

कामहन्ता काममूर्तिः कल्याणो वृषवाहनः ।
गंगाधरो महादेवो दीनबन्धविमोचनः ॥ २७ ॥

धूर्जटिः खण्डपरशुःसद्गुणो गिरिजासखः ।
अव्ययो भूतसेनेशः पापघ्नः पुण्यदायकः ॥ २८ ॥

उपदेष्टा दृढप्रज्ञो रुद्रो रोगविनाशकः ।
नित्यानन्दो निराधारो हरो देवशिखामणिः ॥ २९ ॥

प्रणतार्तिहरः सोमः सान्द्रानन्दो महामतिः ।
आश्च(ऐश्व)र्यवैभवो देवः संसारार्णवतारकः ॥ ३० ॥

यज्ञेशो राजराजेशो भस्मरुद्राक्षलाञ्छनः ।
अनन्तस्तारकः स्थाणुःसर्वविद्येश्वरो हरिः ॥ ३१ ॥

विश्वरूपो विरूपाक्षः प्रभुः परिबृढो दृढः ।
भव्यो जितारिषड्वर्गो महोदारोऽघनाशनः ॥ ३२ ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


सुकीर्तिरादिपुरुषो जरामरणवर्जितः ।
प्रमाणभूतो दुर्ज्ञेयः पुण्यः परपुरंजयः ॥ ३३ ॥

गुणाकरो गुणश्रेष्ठः सच्चिदानन्दविग्रहः ।
सुखदः कारणं कर्ता भवबन्धविमोचकः ॥ ३४ ॥

अनिर्विण्णो गुणग्राही निष्कलङ्कः कलंकहा ।
पुरुषः शाश्वतो योगी व्यक्ताव्यक्तः सनातनः ॥ ३५ ॥

चराचरात्मा विश्वात्मा विश्वकर्मा तमोऽपहृत् ।
भुजंगभूषणो भर्गस्तरुणः करुणालयः ॥ ३६ ॥

अणिमादिगुणोपेतो लोकवश्यविधायकः ।
योगपट्टधरो मुक्तो मुक्तानां परमा गतिः ॥ ३७ ॥

गुरुरूपधरः श्रीमान् परमानन्दसागरः ।
सहस्रबाहुः सर्वेशः सहस्रावयवान्वितः ॥ ३८ ॥

सहस्रमूर्धा सर्वात्मा सहस्राक्षः सहस्रपात् ।
निर्विकल्पो निराभासः शान्तः सूक्ष्मः परात्परः ॥ ३९ ॥

सर्वात्मकः सर्वसाक्षी निस्संगो निरुपद्रवः ।
निर्लेपः सकलाध्यक्षः चिन्मयस्तमसः परः ॥ ४० ॥

ज्ञानवैराग्यसंपन्नो योगानन्दमयः शिवः ।
शाश्वतैश्वर्यसंपूर्णो महायोगीश्वरेश्वरः ॥ ४१ ॥

सहस्रशक्तिसंयुक्तः पुण्यकायो दुरासदः ।
तारकब्रह्म संपूर्णः तपस्विजनसंवृतः ॥ ४२ ॥

विधीन्द्रामरसंपूज्यो ज्योतिषां ज्योतिरुत्तमः ।
निरक्षरो निरालंबः स्वात्मारामो विकर्तनः ॥ ४३ ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


निरवद्यो निरातङ्को भीमो भीमपराक्रमः ।
वीरभद्रः पुरारातिर्जलन्धरशिरोहरः ॥ ४४ ॥

अन्धकासुरसंहर्ता भगनेत्रभिदद्भुतः ।
विश्वग्रासोऽधर्मशत्रुर्ब्रह्मज्ञानै(नन्दै)कमन्दिरः ॥ ४५ ॥

अग्रेसरस्तीर्थभूतः सितभस्मावगुण्ठनः ।
अकुण्ठमेधाः श्रीकण्ठो वैकुण्ठपरमप्रियः ॥ ४६ ॥

ललाटोज्ज्वलनेत्राब्जः तुषारकरशेखरः ।
गजासुरशिरश्छेत्ता गंगोद्भासितमूर्धजः ॥ ४७ ॥

कल्याणाचलकोदण्डः कमलापतिसायकः ।
वारां शेवधितूणीरः सरोजासनसारथिः ॥ ४८ ॥

त्रयीतुरंगसंक्रान्तो वासुकिज्याविराजितः ।
रवीन्दुचरणाचारिधरारथविराजितः ॥ ४९ ॥

त्र्यय्यन्तप्रग्रहोदारः उडुकण्ठारवोज्ज्वलः ।
उत्तानभल्लवामाढ्यो लीलाविजितदानवः ॥ ५० ॥

जातु प्रपञ्चजनितजीवनोपायनोत्सुकः ।
संसारार्णवसंमग्न समुद्धरणपण्डितः ॥ ५१ ॥

मत्तद्विरदधिक्कारिगतिवैभवमंजुलः ।
मत्तकोकिलमाधुर्य रसनिर्भरनिस्वनः ॥ ५२ ॥

कैवल्योदितकल्लोललीलाताण्डवपण्डितः ।
विष्णुर्जिष्णुर्वासुदेवः प्रभविष्णुः पुरातनः ॥ ५३ ॥

वर्धिष्णुर्वरदो वैद्यो हरिर्नारायणोऽच्युतः ।
अज्ञानवनदावाग्निः प्रज्ञाप्रासादभूपतिः ॥ ५४ ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



सर्वभूषितसर्वाङ्गः कर्पूरोज्ज्वलिताकृतिः ।
अनादिमध्यनिधनो गिरिशो गिरिजापतिः ॥ ५५ ॥

वीतरागो विनीतात्मा तपस्वी भूतभावनः ।
देवासुरगुरुर्ध्येयो(देवो) देवासुरनमस्कृतिः ॥ ५६ ॥

देवादिदेवो देवर्षिर्देवासुरवरप्रदः ।
सर्वदेवमयोऽचिन्त्यो देवतात्माऽऽत्मसंभवः ॥ ५७ ॥

निर्लेपो निष्प्रपञ्चात्मा निर्व्यग्रो विघ्ननाशनः ।
एकज्योतिर्निरानन्दो व्याप्तमूर्तिरनाकुलः ॥ ५८ ॥

निरवद्यो बहू(धो)पायो विद्याराशिरकृत्रिमः ।
नित्यानन्दः सुराध्यक्षो निस्संकल्पो निरंजनः ॥ ५९ ॥

निरातङ्को निराकारो निष्प्रपञ्चो निरामयः ।
विद्याधरो वियत्केशो मार्कण्डयौवनः प्रभुः ॥ ६० ॥

भैरवो भैरवीनाथः कामदः कमलासनः ।
वेदवेद्यः सुरानन्दो लसज्ज्योतिः प्रभाकरः ॥ ६१ ॥

चूडामणिः सुरांधीशो यक्षगेयो हरिप्रियः ।
निर्लेपो नीतिमान् सूत्री श्रीहालाहलसुन्दरः ॥ ६२ ॥

धर्मरक्षो महाराजः किरीटी वन्दितो गुहः ।
माधवो यामिनीनाथः शंबरः शंबरीप्रियः ॥ ६३ ॥

संगीतवेत्ता लोकज्ञः शान्तः कलशसंभवः ।
ब्रह्मण्यो वरदो नित्यः शूली गुरुपरो हरः ॥ ६४ ॥

मार्तण्डः पुण्डरीकाक्षः कर्मज्ञो लोकनायकः ।
त्रिविक्रमो मुकुन्दार्च्यो वैद्यनाथः पुरन्दरः ॥ ६५ ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


भाषाविहीनो भाषाज्ञो विघ्नेशो विघ्ननाशनः ।
किन्नरेशो बृहद्भानुः श्रीनिवासः कपालभृत् ॥ ६६ ॥

विजयी भूतवाहश्च भीमसेनो दिवाकरः ।
बिल्वप्रियो वसिष्ठेशः सर्वमार्गप्रवर्तकः ॥ ६७ ॥

ओषधीशो वामदेवो गोविन्दो नीललोहितः ।
षडर्धनयनः श्रीमान् महादेवो वृषध्वजः ॥ ६८ ॥

कर्पूरवीटिकालोलः कर्पूरवरचर्चितः ।
अव्याजकरुणामूर्तिस्त्यागराजः क्षपाकरः ॥ ६९ ॥

आश्चर्यविग्रहः सूक्ष्मः सिद्धेशः स्वर्णभैरवः ।
देवराजः कृपासिन्धुरद्वयोऽमितविक्रमः ॥ ७० ॥

निर्भेदो नित्यसत्वस्थो निर्योगक्षेम आत्मवान् ।
निरपायो निरासङ्गो निःशब्दो निरुपाधिकः ॥ ७१ ॥

भवः सर्वेश्वरः स्वामी भवभीतिविभंजनः ।
दारिद्र्यतृणकूटाग्निः दारितासुरसन्ततिः ॥ ७२ ॥

मुक्तिदो मुदितः कुब्जो धार्मिको भक्तवत्सलः ।
अभ्यासातिशयज्ञेयश्चन्द्रमौलिः कलाधरः ॥ ७३ ॥

महाबलो महावीर्यो विभुःश्रीशः शुभप्रदः (प्रियः) ।
सिद्धःपुराणपुरुषो रणमण्डलभैरवः ॥ ७४ ॥

सद्योजातो वटारण्यवासी पुरुषवल्लभः ।
हरिकेशो महात्राता नीलग्रीवः सुमंगलः ॥ ७५ ॥

हिरण्यबाहुस्तिग्मांशुः कामेशः सोमविग्रहः ।
सर्वात्मा सर्वसत्कर्ता ताण्डवो मुण्डमालिकः ॥ ७६ ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



अग्रगण्यः सुगंभीरो देशिको वैदिकोत्तमः ।
प्रसन्नदेवो वागीशः चिन्तातिमिरभास्करः ॥ ७७ ॥

गौरीपतिस्तुङ्गमौलिः मधुराजो महाकविः ।
श्रीधरः सर्वसिद्धेशो विश्वनाथो दयानिधिः ॥ ७८ ॥

अन्तर्मुखो बहिर्दृष्टिः सिद्धवेषो मनोहरः ।
कृत्तिवासाः कृपासिन्धुर्मन्त्रसिद्धो मतिप्रदः ॥ ७९ ॥

महोत्कृष्टः पुण्यकरो जगत्साक्षी सदाशिवः ।
महाक्रतुर्महायज्वा विश्वकर्मा तपोनिधिः ॥ ८० ॥

छन्दोमयो महाज्ञानी सर्वज्ञो देववन्दितः ।
सार्वभौमः सदानन्दः करुणामृतवारिधिः ॥ ८१ ॥

कालकालः कलिध्वंसी जरामरणनाशकः ।
शितिकण्ठश्चिदानन्दो योगिनीगणसेवितः ॥ ८२ ॥

चण्डीशः सुखसंवेद्यः पुण्यश्लोको दिवस्पतिः ।
स्थायी सकलतत्त्वात्मा सदा सेवकवर्धकः ॥ ८३ ॥

रोहिताश्वः क्षमारूपी तप्तचामीकरप्रभः ।
त्रियंबको वररुचिः देवदेवश्चतुर्भुजः ॥ ८४ ॥

विश्वंभरो विचित्रांगो विधाता पुरनाश(शास)नः ।
सुब्रह्मण्यो जगत्स्वामी लोहिताक्षः शिवोत्तमः ॥ ८५ ॥

नक्षत्रमाल्याभरणो भगवान् तमसः परः ।
विधिकर्ता विधानज्ञः प्रधानपुरुषेश्वरः ॥ ८६ ॥

चिन्तामणिः सुरगुरुर्ध्येयो नीराजनप्रियः ।
गोविन्दो राजराजेशो बहुपुष्पार्चनप्रियः ॥ ८७ ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


सर्वानन्दो दयारूपी शैलजासुमनोहरः ।
सुविक्रमः सर्वगतो हेतुसाधनवर्जितः ॥ ८८ ॥

वृषाङ्को रमणीयाङ्गः सत्कर्ता सामपारगः ।
चिन्ताशोकप्रशमनः सर्वविद्याविशारदः ॥ ८९ ॥

भक्तविज्ञप्तिसन्धाता वक्ता गिरिवराकृतिः ।
ज्ञानप्रदो मनोवासः क्षेम्यो मोहविनाशनः ॥ ९० ॥

सुरोत्तमश्चित्रभानुः सदा वैभवतत्परः ।
सुहृदग्रेसरः सिद्धो ज्ञानमुद्रो गणाधिपः ॥ ९१ ॥

अमरश्चर्मवसनो वाञ्छितार्थफलप्रदः ।
असमानोऽन्तरहितो देवसिंहासनाधिपः ॥ ९२ ॥

विवादहन्ता सर्वात्मा कालः कालविवर्जितः ।
विश्वातीतो विश्वकर्ता विश्वेशो विश्वकारणः ॥ ९३ ॥

योगिध्येयो योगनिष्ठो योगात्मा योगवित्तमः ।
ओंकाररूपो भगवान् बिन्दुनादमयः शिवः ॥ ९४ ॥

चतुर्मुखादिसंस्तुत्यश्चतुर्वर्गफलप्रदः ।
सह्याचलगुहावासी साक्षान्मोक्षरसाकृतिः ॥ ९५ ॥

दक्षाध्वरसमुच्छेत्ता पक्षपातविवर्जितः ।
ओंकारवाचकः शंभुः शंकरः शशिशीतलः ॥ ९६ ॥

पङ्कजासनसंसेव्यः किंकरामरवत्सलः ।
नतदौर्भाग्यतूलाग्निः कृतकौतुकविभ्रमः ॥ ९७ ॥

त्रिलोकमोहनः श्रीमान् त्रिपुण्ड्रांकितमस्तकः ।
क्रौञ्चारिजनकः श्रीमद्गणनाथसुतान्वितः ॥ ९८ ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



अद्भुतोऽनन्तवरदोऽपरिच्छेद्यात्मवैभवः ।
इष्टापूर्तप्रियः शर्व एकवीरप्रियंवदः ॥ ९९ ॥

ऊहापोहविनिर्मुक्त ओंकारेश्वरपूजितः ।
कलानिधिः कीर्तिनाथः कामेशीहृदयंगमः ॥ १०० ॥

कामेश्वरः कामरूपो गणनाथसहोदरः ।
गाढो गगनगंभीरो गोपालो गोचरो गुरुः ॥ १०१ ॥

गणेशो गायको गोप्ता गाणापत्यगणप्रियः ।
घण्टानिनादरुचिरः कर्णलज्जाविभंजनः ॥ १०२ ॥

केशवः केवलः कान्तश्चक्रपाणिश्चराचरः ।
घनाघनो घोषयुक्तश्चण्डीहृदयनन्दनः ॥ १०३ ॥

चित्रार्पितश्चित्रमयः चिन्तितार्थप्रदायकः ।
छद्मचारी छद्मगतिः चिदाभासश्चिदात्मकः ॥ १०४ ॥

छन्दोमयश्छत्रपतिः छन्दःशास्त्रविशारदः ।
जीवनो जीवनाधारो ज्योतिःशास्त्रविशारदः ॥ १०५ ॥

ज्योतिर्ज्योत्स्नामयो जेता जीमूतवरदायकः ।
जनाघनाशनो जीवो जीवदो जीवनौषधम् ॥ १०६ ॥

जराहरो जाड्यहरो ज्योत्स्नाजालप्रवर्तकः ।
ज्ञानेश्वरो ज्ञानगम्यो ज्ञानमार्गपरायणः ॥ १०७ ॥

तरुस्थस्तरुमध्यस्थो डामरीशक्तिरंजकः ।
तारकस्तारतम्यात्मा टीपस्तर्पणकारकः ॥ १०८ ॥

तुषाराचलमध्यस्थस्तुषारकरभूषणः ।
त्रिसुगन्धस्त्रिमूर्तिश्च त्रिमुखस्त्रिककुद्धरः ॥ १०९ ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


त्रिलोकीमुद्रिकाभूषः त्रिकालज्ञस्त्रयीमयः ।
तत्वरूपस्तरुस्थायी तन्त्रीवादनतत्परः ॥ ११० ॥

अद्भुतानन्तसंग्रामो ढक्कावादनतत्परः(कौतुकः) ।
तुष्टस्तुष्टिमयः स्तोत्रपाठकोऽति(काति)प्रियस्तवः ॥ १११ ॥

तीर्थप्रियस्तीर्थरतः तीर्थाटनपरायणः ।
तैलदीपप्रियस्तैलपक्वान्नप्रीतमानसः ॥ ११२ ॥

तैलाभिषेकसन्तुष्टस्तिलचर्वणतत्परः ।
दीनार्तिहृद्दीनबन्धुर्दीननाथो दयापरः ॥ ११३ ॥

दनुजारिर्दुःखहन्ता दुष्टभूतनिषूदनः ।
दीनोरुदायको दान्तो दीप्तिमान्दिव्यलोचनः ॥ ११४ ॥

देदीप्यमानो दुर्ज्ञेयो दीनसंमानतोषितः ।
दक्षिणाप्रेमसन्तुष्टो दारिद्र्यबडबानलः ॥ ११५ ॥

धर्मो धर्मप्रदो ध्येयो धीमान्धैर्यविभूषितः ।
नानारूपधरो नम्रो नदीपुलिनसंश्रितः ॥ ११६ ॥

नटप्रियो नाट्यकरो नारीमानसमोहनः ।
नारदो नामरहितो नानामन्त्ररहस्यवित् ॥ ११७ ॥

पतिः पातित्यसंहर्ता परविद्याविकर्षकः ।
पुराणपुरुषः पुण्यः पद्यगद्यप्रदायकः ॥ ११८ ॥

पार्वतीरमणः पूर्णः पुराणागमसूचकः ।
पशूपहाररसिकः पुत्रदः पुत्रपूजितः ॥ ११९ ॥

ब्रह्माण्डभेदनो ब्रह्मज्ञानी ब्राह्मणपालकः ।
भूताध्यक्षो भूतपतिर्भूतभीतिनिवारणः ॥ १२० ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



भद्राकारो भीमगर्भो भीमसंग्रामलोलुपः ।
भस्मभूषो भस्मसंस्थो भैक्ष्यकर्मपरायणः ।। १२१ ।।

भानुभूषो भानुरूपो भवानीप्रीतिदायकः ।
भवप्रियो भावरतो भावाभावविवर्जितः ।। १२२ ।।

भ्राजिष्णुजी(र्जी)वसन्तुष्टो भट्टारो भद्रवाहनः ।
भद्रदो भ्रान्तिरहितो भीमचण्डीपतिर्महान् ।। १२३ ।।

यजुर्वेदप्रियो याजी यमसंयमसंयुतः ।
रामपूज्यो रामनाथो रत्नदो रत्नहारकः ।। १२४ ।।

राज्यदो रामवरदो रंजको रतिमार्गधृत् ।
रामानन्दमयो रम्यो राजराजेश्वरो रसः ।। १२५ ।।

रत्नमन्दिरमध्यस्थो रत्नपूजापरायणः ।
रत्नाकारो लक्षणेशो लक्ष्यदो लक्ष्यलक्षणः ।। १२६ ।।

लोलाक्षीनायको लोभी लक्षमन्त्रजपप्रियः ।
लंबिकामार्गनिरतो लक्ष्यकोट्यण्डनायकः ।। १२७ ।।

विद्याप्रदो वीतिहोता वीरविद्याविकर्षकः ।
वाराहीपालको वन्यो वनवासी वनप्रियः ।। १२८ ।।

वनेचरो वनचरः शक्तिपूज्यः शिखिप्रियः ।
शरच्चन्द्रनिभः शान्तः शक्तः संशयवर्जितः ।। १२९ ।।

शापानुग्रहदः शंखप्रियः शत्रुनिषूदनः ।
षट्कृत्तिकासुसंपूज्यः षट्शास्त्रार्थरहस्यवित् ।। १३० ।।

सुभगः सर्वजित्सौम्यः सिद्धमार्गप्रवर्तकः ।
सहजानन्ददः सोमः सर्वशास्त्र रहस्यवित् ।। १३१ ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


सर्वजित्सर्ववित्साधुः सर्वधर्म समन्वितः ।
सर्वाध्यक्षः सर्वदेवो महर्षिर्मोहनास्त्रवित् ।। १३२ ।।

क्षेमङ्करः क्षेत्रपालः क्षयरोगक्षयङ्करः ।
निःसीममहिमा नित्यो लीलाविग्रहरूपधृत् ।। १३३ ।।

चन्दनद्रवदिग्धाङ्गः चांपेयकुसुमप्रियः ।
समस्तभक्तसुखदः परमाणुर्महाह्रदः ।। १३४ ।।

आकाशगो दुष्प्रधर्षः कपिलः कालकन्धरः ।
कर्पूरगौरः कुशलः सत्यसन्धो जितेन्द्रियः ।। १३५ ।।

शाश्वतैश्वर्यविभवः पुष्करः सुसमाहितः ।
महर्षिः पण्डितो ब्रह्मयोनिः सर्वोत्तमोत्तमः ।। १३६ ।।

भूमिभारार्तिसंहर्ता षडूर्मिरहितो मृडः ।
त्रिविष्टपेश्वरः सर्वहृदयांबुजमध्यगः ।। १३७ ।।

सहस्रदलपद्मस्थः सर्ववर्णोपशोभितः ।
पुण्यमूर्तिः पुण्यलभ्यः पुण्यश्रवणकीर्तनः ।। १३८ ।।

सूर्यमण्डलमध्यस्थश्चन्द्रमण्डलमध्यगः ।
सद्भक्तध्याननिगलः शरणागतपालकः ।। १३९ ।।

श्वेतातपत्ररुचिरः श्वेतचामरवीजितः ।
सर्वावयसंपूर्णः सर्वलक्षणलक्षितः ।। १४० ।।

सर्वमङ्गलामांगल्यः सर्वकारणकारणम् ।
आमोदमोदजनकः सर्पराजोत्तरीयकः ।। १४१ ।।

कपाली गोविन्दसिद्धःकान्तिसंवलिताननः ।
सर्वसद्गुरुसंसेव्यो दिव्यचन्दनचर्चितः ।। १४२ ।।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


विलासिनीकृतोल्लासः इच्छाशक्तिनिषेवितः ।
अनन्तोऽनन्तसुखदो नन्दनः श्रीनिकेतनः ॥ १४३ ॥

अमृताब्धिकृतावासो (तोल्लासी) नित्यक्लिन्नो निरामयः ।
अनपायोऽनन्तदृष्टिः अप्रमेयोऽजरोऽमरः ॥ १४४

अनामयोऽप्रतिहतश्चाऽप्रतर्क्योऽमृतोऽक्षरः ।
अमोघसिद्धिराधार आधाराधेयवर्जितः ॥ १४५ ॥

ईषणात्रयनिर्मुक्त ईहामात्रविवर्जितः ।
ऋग्यजुःसामनयन ऋद्धिसिद्धिसमृद्धिदः ॥ १४६ ॥

औदार्यनिधिरापूर्ण ऐहिकामुष्मिकप्रदः ।
शुद्धसन्मात्रसंवित्तास्वरूपसु(मु)खविग्रहः ॥ १४७ ॥

दर्शनप्रथमाभासो दुष्टदर्शनवर्जितः ।
अग्रगण्योऽचिन्त्यरूपः कलिकल्मषनाशनः ॥ १४८ ॥

विमर्शरूपो विमलो नित्यतृप्तो निराश्रयः ।
नित्यशुद्धो नित्यबुद्धो नित्यमुक्तो निरावृतः ॥ १४९ ॥

मैत्र्यादिवासनालभ्यो महाप्रलयसंस्थितः ।
महाकैलासनिलयः प्रज्ञानघनविग्रहः ॥ १५० ॥

श्रीमद्व्याघ्रपुरावासो भुक्तिमुक्तिफलप्रदः ।
जगद्योनिर्जगत्साक्षी जगदीशो जगन्मयः ॥ १५१ ॥

जपो जपपरो जप्यो विद्यासिंहासनप्रभुः ।
तत्त्वानां प्रकृतिस्तत्त्वं तत्त्वंपदनिरूपितः ॥ १५२ ॥

दिक्कालाद्यनवच्छिन्नः सहजानन्दसागरः ।
प्रकृतिः प्राकृतातीतः प्रज्ञानैकरसाकृतिः ॥ १५३ ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


निःशङ्कमतिदूरस्थः चेत्यचेतनचिन्तकः ।
तारकान्तरसंस्थानस्तारकस्तारकान्तकः ॥ १५४ ॥
ध्यानैकप्रकटो ध्येयो ध्यानं (नी) ध्यानविभूषणः ।
परं व्योम परं धाम परमाणुः परं पदम् ॥ १५५ ॥
पूर्णानन्दः सदानन्दो नादमध्यप्रतिष्ठितः ।
प्रमाविपर्यया(णप्रत्यया)तीतः प्रणताज्ञाननाशकः ॥ १५६ ॥
बाणार्चितांघ्रिर्बहुदो बालकेलिकुतूहलः ।
बृहत्तमो ब्रह्मपदो ब्रह्मविद्ब्रह्मवित्प्रियः ॥ १५७ ॥
भ्रूक्षेपदत्तलक्ष्मीको भ्रूमध्यध्यानलक्षितः ।
यशस्करो रत्नगर्भो महाराज्यसुख प्रदः ॥ १५८ ॥
शब्दब्रह्म शमप्राप्यो लाभकृल्लोकविश्रुतः ।
शास्ता शिखाग्रनिलयः शरण्यो याजकप्रियः ॥ १५९ ॥
संसारवेद्यः सर्वज्ञः सर्वभेषजभेषजम् ।
मनोवाचाभिरग्राह्यः पञ्चकोशविलक्षणः ॥ १६० ॥
अवस्थात्रयनिर्मुक्तस्त्वक्स्थः साक्षी तुरीयकः ।
पञ्चभूतादिदूरस्थः प्रत्यङ्ङेकरसोऽव्ययः ॥ १६१ ॥
षट्चक्रान्तःकृतोल्लासः षड्विकारविवर्जितः ।
विज्ञानघनसंपूर्णो वीणावादनतत्परः ॥ १६२ ॥
नीहाराकारगौरांगो महालावण्यवारिधिः ।
पराभिचारशमनः षडध्वोपरि संस्थितः ॥ १६३ ॥
सुषुम्नामार्ग सञ्चारी बिसतन्तुनिभाकृतिः ।
पिनाकी लिङ्गरूपः श्रीमङ्गलावयवोज्ज्वलः ॥ १६४ ॥
क्षेत्राधिपः सुसंवेद्यः श्रीप्रदो विभवप्रदः ।
सर्ववश्यकरः सर्वतोषकः पुत्रपौत्रदः ।
आत्मनाथस्तीर्थनाथः सप्त(प्ति)नाथः सदाशिवः ॥ १६५

*—*—*

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



# दक्षिणामूर्तिसहस्रनामावलिः

ओं आदिदेवाय नमः । दयासिन्धवे । अखिलागमदेशिकाय । दक्षिणामूर्तये । अतुलाय । शिक्षितासुरविक्रमाय । कैलासशिखरोल्लासिने । कमनीयनिजाकृतये । वीरासनसमासीनाय । वीणापुस्तलसत्कराय । अक्षमालालसत्पाणये । चिन्मुद्रितकरांबुजाय । अपस्मारोपरिन्यस्तसव्यपादसरोरुहाय । चारुचामीकराकार जटालार्पितचन्द्रमसे । अर्धचन्द्राभनिटिलपाटीरतिलकोज्ज्वलाय । करुणालहरी पूर्णकर्णान्तायतलोचनाय । कर्णदिव्योल्लसद्दिव्यमणिकुण्डलमण्डिताय । वरवज्रशिलादर्शपरिभवि कपोलभुवे । चारुचांपेय पुष्पाभनासिकापुटरञ्जिताय । दन्तालिकुसुमोत्कृष्टकोमलाधरपल्लवाय नमः ॥ २० ॥

ओं मुग्धस्मितपरीपाक प्रकाशितरदाङ्कुराय नमः । अनाकलितसादृश्यचिबुकश्रीविराजिताय । अनर्घरत्नग्रैवेय विलसत्कंबुकन्धराय । माणिक्यकंकणोल्लासिकरांबुजविराजिताय । मुक्ताहारलसत्तुङ्ग विपुलोरस्कराजिताय । आवर्तनाभिरोमालिवलित्रययुतोदराय । विशंकटकटिन्यस्तवाचालमणिमेखलाय । करिहस्तोपमेयोरवे । आदर्शोज्ज्वलजानुकाय । कन्दर्पतूणीजिज्जंघाय । गुल्फोदञ्चितनूपुराय । मणिमञ्जीरकिरण किञ्जल्कितपदांबुजाय । शाणोल्लीढमणिश्रेणीरम्यांघ्रिनखमण्डलाय । आपादकर्णकामुक्तभूषाशतमनोहराय । सनकादिमहायोगिसमाराधितपादुकाय । यक्षकिन्नरगन्धर्व स्तूयमानात्मवैभवाय । ब्रह्मादिदेवविनुताय । योगमाया नियोजकाय । शिवयोगिने । शिवानन्दाय नमः ॥ ४० ॥

ओं शिवभक्तिसमुत्तराय नमः । वेदान्तसारसन्दोहाय । सर्वसत्त्वावलंबनाय । वटमूलाश्रयाय । वाग्मिने । मान्याय ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


मलयजप्रियाय । सुखदाय। वाञ्छितार्थज्ञाय। प्रसन्नवदनेक्षणाय । कर्मसाक्षिणे। कर्ममा(या)यिने। सर्वकर्मफलप्रदाय। ज्ञानदात्रे। सदाचाराय। सर्वपापविमोचनाय। अनाथनाथाय। भगवते। आश्रितामरपादपाय। वरप्रदाय नमः ॥ ६० ॥

ओं प्रकाशात्मने नमः। सर्वभूतहिते रताय। व्याघ्रचर्मासनासीनाय। आदिकर्त्रे। महेश्वराय। सुविक्रमाय। सर्वगताय। विशिष्टजनवत्सलाय। चिन्ताशोकप्रशमनाय। जगदानन्दकारकाय। रश्मिमते। भुवनेशानाय। देवासुरसुपूजिताय। मृत्युञ्जयाय। व्योमकेशाय। षट्त्रिंशत्तत्वसंग्रहाय। अज्ञातसंभवाय। भिक्षवे। अद्वितीयाय। दिगंबराय नमः ॥ ८० ॥

ओं समस्तदेवतामूर्तये नमः। सोमसूर्याग्निलोचनाय। सर्वसाम्राज्यनिपुणाय। धर्ममार्गप्रवर्तकाय। विश्वाधिकाय। पशुपतये। पशुपाशविमोचकाय। अष्टमूर्तये। दीप्तमूर्तये। नामोच्चारणमुक्तिदाय। सहस्रादित्यसंकाशाय। सदा षोडशवार्षिकाय। दिव्यकेलीसमायुक्ताय। दिव्यमाल्यांबरावृताय। अनर्घरत्नसंपूर्णाय। मल्लिकाकुसुमप्रियाय। तप्तचामीकराकाराय। क्रुद्धदावानलाकृतये। निरञ्जनाय। निर्विकाराय नमः ॥ १०० ॥

ओं निजा(रा)वासाय नमः। निराकृतये। जगद्गुरवे। जगत्कर्त्रे। जगदीशाय। जगत्पतये। कामहन्त्रे। काममूर्तये। कल्याणाय। वृषवाहनाय। गंगाधराय। महादेवाय। दीनबन्धविमोचनाय। धूर्जटये। खण्डपरशवे। सद्गुणाय। गिरिजासखाय। अव्ययाय। भूतसेनेशाय। पापघ्नाय नमः ॥ १२०

ओं पुण्यदायकाय नमः। उपदेष्ट्रे। दृढप्रज्ञाय। रुद्राय। रोगविनाशकाय। नित्यानन्दाय। निराधाराय। हराय।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



देवशिखामणये। प्रणतार्तिहराय। सोमाय। सान्द्रानन्दाय। महामतये। आश्चर्य(ऐश्वर्य)वैभवाय। देवाय। संसारार्णवतारकाय। यज्ञेशाय। राजराजेशाय। भस्मरुद्राक्षलाञ्छनाय। अनन्ताय नमः ॥ १४० ॥

ओं तारकाय नमः। स्थाणवे। सर्वविद्येश्वराय। हरये। विश्वरूपाय। विरूपाक्षाय। प्रभवे। परिबृढाय। दृढाय। भव्याय। जितारिषड्वर्गाय। महोदाराय। अघनाशनाय। सुकीर्तये। आदिपुरुषाय। जरामरणवर्जिताय। प्रमाणभूताय। दुर्ज्ञेयाय। पुण्याय। परपुरञ्जयाय नमः ॥ १६० ॥

ओं गुणाकराय नमः। गुणश्रेष्ठाय। सच्चिदानन्दविग्रहाय। सुखदाय। कारणाय। कर्त्रे। भवबन्धविमोचकाय। अनिर्विण्णाय। गुणग्राहिणे। निष्कलंकाय। कलंकघ्ने। पुरुषाय। शाश्वताय। योगिने। व्यक्ताव्यक्ताय। सनातनाय। चराचरात्मने। विश्वात्मने। विश्वकर्मणे। तमोपहृते नमः ॥ १८० ॥

ओं भुजंगभूषणाय नमः। भर्गाय। तरुणाय। करुणालयाय। अणिमादिगुणोपेताय। लोकवश्यविधायकाय। योगपट्टधराय। मुक्ताय। मुक्तानां परमायै गत्यै। गुरुरूपधराय। श्रीमते। परमानन्दसागराय। सहस्रबाहवे। सर्वेशाय। सहस्रावयवान्विताय। सहस्रमूर्ध्ने। सर्वात्मने। सहस्राक्षाय। सहस्रपदे। निर्विकल्पाय नमः ॥ २०० ॥

ओं निराभासाय नमः। शान्ताय। सूक्ष्माय। परात्पराय। सर्वात्मकाय। सर्वसाक्षिणे। निस्संगाय। निरुपद्रवाय। निर्लेपाय। सकलाध्यक्षाय। चिन्मयाय। तमसःपराय। ज्ञानवैराग्यसंपन्नाय। योगानन्दमयाय। शिवाय। शाश्वतैश्वर्यसंपूर्णाय। महायोगीश्वरेश्वराय। सहस्रशक्तिसंयुक्ताय। पुण्यकायाय। दुरासदाय नमः ॥ २२० ॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


ओं तारकब्रह्मणे नमः । संपूर्णाय । तपस्विजनसंवृताय । विधीन्द्रामरसंपूज्याय । ज्योतिषां ज्योतिषे । उत्तमाय । निरक्षराय । निरालंबाय । स्वात्मारामाय । विकर्तनाय । निरवद्याय । निरातङ्काय । भीमाय । भीमपराक्रमाय । वीरभद्राय । पुरारातये । जलन्धरशिरोहराय । अन्धकासुरसंहर्त्रे । भगनेत्रभिदे । अद्भुताय नमः ॥ २४० ॥

ओं विश्वग्रासाय नमः । अधर्मशात्रवे । ब्रह्मानन्दैक-(ब्रह्मज्ञातैक)मन्दिराय । अग्रेसराय । तीर्थभूताय । सितभस्माव-गुण्ठनाय । अकुण्ठमेधसे । श्रीकण्ठाय । वैकुण्ठपरमप्रियाय । ललाटोज्ज्वलनेत्राब्जाय । तुषारकरशेखराय । गजासुरशिरश्छेत्रे । गंगोद्भासितमूर्धजाय । कल्याणाचलकोदण्डाय । कमलापति-सायकाय । वारांशेवधितूणीराय । सरोजासनसारथये । त्रयीतुरङ्ग संक्रान्ताय । वासुकिज्याविराजिताय । रवीन्दुचरणाचारिधरारथ विराजिताय नमः ॥ २६० ॥

ओं त्रय्यन्तप्रग्रहोदाराय नमः । उडुकण्ठारवोज्ज्वलाय । उ(औ)त्तानभल्लवामाढ्याय । लीलाविजितदानवाय । जातुप्र-पञ्चजनित जीवनोपायनोत्सुकाय । संसारार्णव संमग्नसमुद्धरण-पण्डिताय । मत्तद्विरदधिक्कारिगतिवैभवमञ्जुलाय । मत्तकोकिल-माधुर्यरसनिर्भरनिस्वनाय । कैवल्योदितकल्लोललीलाताण्डव-पण्डिताय । विष्णवे । जिष्णवे । वासुदेवाय । प्रभविष्णवे । पुरातनाय । वर्धिष्णवे । वरदाय । वैद्याय । हरये । नारायणाय । अच्युताय नमः ॥ २८० ॥

ओं अज्ञानवनदावाग्नये नमः । प्रज्ञाप्रासादभूपतये । सर्वभूषितसर्वाङ्गाय । कर्पूरोज्ज्वलिताकृतये । अनादिमध्यनिधनाय । गिरिशाय । गिरिजापतये । वीतरागाय । विनीतात्मने । तपस्विने ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



भूतभावनाय । देवासुर गुरवे । ध्येयाय (देवाय) । देवासुरनमस्कृताय । देवादिदेवाय । देवर्षये । देवासुरवरप्रदाय । सर्वदेवमयाय । अचिन्त्याय । देवतात्मने नमः ॥ ३०० ॥

ओं आत्मसंभवाय नमः । निर्लेपाय । निष्प्रपञ्चात्मने । निर्व्यग्राय । विघ्ननाशनाय । एकज्योतिषे । निरानन्दाय । व्याप्तमूर्तये । अनाकुलाय । निरवद्याय । बहू(वधो)पायाय । विद्याराशये । अकृत्रिमाय । नित्यानन्दाय ।सुराध्यक्षाय । निःसंकल्पाय । निरञ्जनाय । निरातङ्काय । निराकाराय । निष्प्रपञ्चाय नमः ॥ ३२० ॥

